THE
KĀSHI SANSKRIT SERIES
( *HARIDĀS SANSKRIT GRANTHAMĀLĀ* )
NO. 75.
( Alankāra Section No. 3. )

THE

# CHANDRĀLOKA

*By*

PĪYŪṢAVARṢA JAYADEVA

*With the Commentary,*
*'S'aradāgama' alias 'Chandrāloka Prakās'a'*
By
PADMANĀBHAMISHRA Alias
PRADYOTANA BHAṬṬĀCHĀRYA

*Edited with Introduction etc.*

NĀRĀYAṆA S'ĀSTRĪ KHISTE, SĀHITYĀCHĀRYA
Assistant Librarian, Govt. Sanskrit Library,
Saraswati Bhavana, Benares.

PRINTED, PUBLISHED & SOLD BY
JAI KRISHNADAS-HARIDAS GUPTA,
*The Chowkhamba Sanskrit Series Office, Vidya Vilas Press,*
*North of Gopalmandir, Benares City.*

1929.

*Registered according to Act XXV. of 1867.*
*( All Rights Reserved by the Publisher. )*

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

IMPERIAL LIBRARY

*Printed by Jai Krishna Das Gupta*
*at the Vidya Vilas Press, Benares,*

Agents:
1 Otto Harrassowitz, Leipzig:
GERMANY.
2 Arthur Probsthain,
Oriental & Foreign Bookseller,
LONDON.
3 The Oriental Book-supplying Agency,
POONA.

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिज़पुस्तकमालायाः

७५

अलङ्कारविभागे (३) तृतीय पुष्पम् ।

# चन्द्रालोकः

पीयूषवर्षश्रीजयदेवकविप्रणीतः ।

श्रीमत्पद्मनाभमिश्रापराभिधानप्रद्योतनभट्टाचार्यविरचितया
चन्द्रालोकप्रकाशापराख्य 'शारदागम'
टीकया सङ्कलितः ।

काशीस्थराजकीयसरस्वतीभवनपुस्तकालयाध्यक्षेण
साहित्याचार्येण खिस्ते-इत्युपाख्यनारायणशास्त्रिणा
भूमिकादिभिः सम्भूष्य सम्पादितः ।

प्रकाशकः—
जयकृष्णदास-हरिदासगुप्तः—
चौखम्बा संस्कृत सीरिज आफिस, विद्याविलास प्रेस,
गोपालमंदिर के उत्तरफाटक, बनारस सिटी ।

विक्रम संवत्
१९८६

राजशासनानुसारेण प्रकाशकेन सर्वेऽधिकाराः स्वायत्तीकृताः ।

इस कार्यालय द्वारा "काशीसंस्कृतसीरिज" के अलावा और भी ३ सीरिज यथा "चौखम्बा संस्कृत सीरिज" "बनारससंस्कृतसीरिज" "हरिदाससंस्कृतसीरिज" ग्रन्थमालायें निकलती हैं तथा इन ४ सीरिजों के पश्चात् और भी विविध शास्त्र की पुस्तकें प्रकाशित की गई है तथा अन्य सब स्थानो के छपे हुए संस्कृत तथा भाषा-भाष्य के ग्रन्थ विक्रयार्थ प्रस्तुत रहते हैं, सूचीपत्र पृथक् मंगवाकर देखें, इसके अलावा हमारे यहां सर्व प्रकार की संस्कृत, हिन्दी, अङ्ग्रेजी की सुन्दर छपाई होती है, परिक्षा प्रार्थनीय है ।

पत्रादि प्रेषणास्थानम्—

जयकृष्णदास-हरिदास गुप्तः—

"चौखम्बा संस्कृतसीरिज़" आफिस, विद्याविलास प्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी ।

# INTRODUCTION.

It is with great pleasure that we are presenting herewith to the votaries of Sanskrit Muse, the text of जयदेव's चन्द्रालोक along with शरदागम, a Commentary by प्रद्योतनभट्टाचार्य. The text of चन्द्रालोक has been published many times at various places. Some commentaries have also been brought out here and there along with the text; but as far as our knowledge goes, शरदागम of प्रद्योतनभट्ट, the Commentary published herewith, has never and nowhere seen the light.

( 1 ) चन्द्रालोक

The चन्द्रालोक is a unique work, dealing with almost all the topics treated of by Sanskrit poeticians. It is undoubtedly elementary in character and method of treatment and is in no way comparable with other standard works which bristle with elaborate disquisitions and learned discussions on almost every page of them. It consists of कारिकाs written in अनुष्टुप् metre, in a style which is lucid and easy and in a language which is flowing and sonorous. Like भामह and दण्डी, he gives his own examples, but his superiority to these आचार्यs in this respect, is clearly borne out by the succintness and pithiness of his apt and appropriate illustrations. In most cases, one half of the कारिका gives the definition and the other its example. It has been, for reasons like these, very popular among the pandits and students. It has been often drawn upon by Sanskrit and vernacular writers as a source of inspiration and an object of imitation. In this connection, अप्पयदीक्षित deserves special mention. अप्पयदीक्षित's कुवलयानन्द is but a wholesale adaptation of the अर्थालङ्कार portion of

चन्द्रालोक. There is no other work, as far as we know, which may be confidently placed in the hands of ardent beginners as a safe guide to the study of Sanskrit Poetics on old traditional lines.

### ( 2 ) जयदेव

The author of चन्द्रालोक calls himself जयदेव[1] and styles himself as पीयूषवर्ष[2] by way of a nom de plume, as it were. Now it is very difficult to find out who and what he really was. There are no less than 15 जयदेवs mentioned by Aufrecht in his Catalogus Catalogorum. The only means which we have at our disposal for identifying the author of चन्द्रालोक are the names of his parents which he has given in the verse found at the end of every मयूख. They were महादेव and सुमित्रा. The only other जयदेव who has महादेव for his father and सुमित्रा for his mother, was the author of प्रसन्नराघव[3]. Aufrecht's identification with the author

---

1. We find the followning श्लोक at the end of every मयूख with slight modifications—

महादेवः सत्रप्रमुखमखविधैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
अनेनाऽसावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ I. 16.

2. हंहो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान्
रे रे स्वैरिणि निर्विचारकविते मास्मत् प्रकाशीभव ।
उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥ I. 2.

गागाभट्ट in his commentary, known as राकागम, says: "जयदेवस्यैव पीयूषवर्ष इति नामान्तरम्" ।

3. कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥
अपि च लक्ष्मणस्येव यस्यास्य सुमित्राकुक्षिजन्मनः
रामचन्द्रपदाम्भोजे भ्रमद् भृङ्गायते मनः ॥ I. 14-15.

of गीतगोविन्द[1] is clearly disproved by the fact that his parents were भोजदेव and रामादेवी[2] and not महादेव and सुमित्रा. Hall was led to think that our author was the same as पक्षधर, the author of मयूखालोक[3]. Some other scholars[4] also subscribe to this view, but the arguments put forward for the purpose are in no way conclusive.

As regards his date, we may confess at the very outset that the available data do not enable us to determine it with perfect exactitude. He mentions none by name. There is, however, one कारिका[5] in which he clearly appears to criticise the view of मम्मट. This fact may furnish us with one terminus. We can come down still further. The first person to treat of the figures विकल्प and विचित्र was most probably the author of अलङ्कारसर्वस्व[6]. These figures are found dealt with by our author also. Moreover, if we were to pay attention to the number of figures defined and illustrated by the writers of काव्यप्रकाश, अलङ्कारसर्वस्व and चन्द्रालोक,

---

1. Z. D. M. G. XXVII. 30.
2. श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
   पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥
   गीतगोविन्द १२ । ११
3. Introduction to सांख्यप्रवचनभाष्य, pp. 62-63.
4. Peterson सुभाषितावली 37f; Eggeling, India Office Catalogue, III. 332; Keith, Indian Logic and Atomism p. 332.
5. "अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
   असौ न मन्यते कस्मादनुष्णमनलङ्कृती ॥ चन्द्रालोक 1. 8.
6. रुय्यक defines विकल्प as "तुल्यबलविरोधो विकल्पः" and विचित्र as "स्वविपरीतफलनिष्पत्तये प्रयत्नो विचित्रम्" । जयदेव speaks of विकल्प as "विरोधे तुल्यबलयोर्विकल्पालङ्कृतिर्मता" and विचित्र as विचित्रं तत्प्रयत्नश्चेद् विपरीतः फलेच्छया ।

we shall not fail to see a kind of gradual development. मम्मट has only 61, while रुय्यक has 75. जयदेव speaks of no less than 100 अलङ्कारs. जयदेव clearly admits that he took the views of other writers into consideration for writing his चन्द्रालोक[1]. We may take it, therefore, that जयदेव is not earlier–at least not much earlier–than रुय्यक, who lived about 1200 A. C. So 1200 A. C. may be conveniently taken to supply us with the upper limit of जयदेव's date.

With reference to the other limit, we may mention केशवमिश्र, who in his अलङ्कारशेखर quotes a verse[2] from प्रसन्नराघव. केशवमिश्र at one place speaks of a poet who vanquished all the pandits in the court of an उत्कल king by his logical subtlety[3]. This poet is no doubt called जयदेव, but, as we have shown above, there have been so many जयदेवs that it is not an easy task to determine their identity. The जयदेव, just mentioned, may well be the author of गीतगोविन्द, who speaks of himself at one place as जयदेवपण्डितकवि[4]. It may be in any case taken for granted from the evidence of the verse referred to above that our author was earlier than केशव मिश्र । केशवमिश्र was living about 1600 A. C.[5].

प्रद्योतनभट्ट, about whom we are going to speak later on, wrote his शरदागम, the Commentary published

---

1. इत्थं शतमलङ्कारा लक्षयित्वा निदर्शिताः ।
   प्राचामाधुनिकानाञ्च मतान्यालोच्य सर्वतः ॥ चन्द्रालोक I 173
2. कदली कदली करभः करभः etc.
3. ये केऽप्युत्कलभूपते ! तव सभासंभाविताः पण्डिताः
   पत्रं श्रीजयदेवपण्डितकविस्तन्मूर्ध्नि विन्यस्यति ॥
   अलङ्कारशेखर, p. 18 ( Benares Edn. )
4. तत्सर्वं जयदेव पण्डितकवेः कृष्णैकतानात्मनः etc. गीतगोविन्द, p.
5. A. S. Vetal's प्रस्तावना to अलङ्कारशेखर ( Benares Edn. )

herewith, is 1583 A. C. There are several verses found in शार्ङ्गधर पद्धति[1] which are taken from प्रसन्नराघव[2]. शार्ङ्गधर lived about 1363 A. C.[3] शिङ्गभूपाल, the author of रसार्णवसुधाकर, cites twice प्रसन्नराघव[4] by name. He lived about 1330 A. C.[5]. It may thus be concluded that the first quarter of the 14th century forms the other limit. So we may say that जयदेव lived somewhere between 1200 and 1330 A. C. Most probably his exact date will be about the middle or end of the 14th Century[6].

## ( 3 ) COMMENTATORS AND COMMENTARIES OF चन्द्रालोक

चन्द्रालोक has been so popular that a number of scholars were coming forward from time to time for writing commentaries upon it. Some of them may be mentioned below:

( 1 ) चन्द्रालोकप्रकाश or शरदागम, by प्रद्योतनभट्ट

( 2 ) रमा, by वैद्यनाथ पायगुण्डे, the well-known author of a large number of works. He was a pupil of नागेशभट्ट and was popularly known as बालंभट्ट. This commentary has been published by the Gujrati Printing Press, Bombay.

3. राकागम or सुधा, by गागाभट्ट alias विश्वेश्वर son of दिनकरभट्ट and nephew of the well-known मीमांसक कमलाकरभट्ट. विश्वेश्वर lived about the beginning of the 18th century. This commentary has not yet been

---

1. शार्ङ्गधरपद्धति, Nos. 164, 352, 3557, 3626, 3631.
2. प्रसन्नराघव, I. 9, 133, II. 22, 759, 760
3. Aufrecht, Z. D. M. G, XXV, 455; XXVII, 1th.
4. रसार्णवसुधाकर, pp. 258, 277.
5. S'eshagiri S'āstri's Report on a Search for Sanskrit and Tamil Manuscripts for the year 1896-97, pp. 7-10.
6. This is also the view of Dr. S K. De. Cp his Sanskrit Poetics, Vol I

published but is going to be shortly brought out by my friends Pandits A. S. Vetal and J. S. Hoshing.

4. बाजचन्द्रचन्द्रिका. My friend Pandit A. S. Vetal assures me that it is but a summary of राकागम. Most probably it was written by गागाभट्ट for a certain chief बाजचन्द्र. Later on he made it much more elaborate and made it known as राकागम।

There are some other commentaries still less known, such as चन्द्रालोकदीपिका, निगूढार्थदीपिका, शारदशर्वरी and others. They are lying in MS. libraries and there is little prospect of their being ever published.

The अर्थालङ्कार portion of चन्द्रालोक has been much more popular and so there are commentaries which have to do with that portion only. अप्पयदीक्षित's कुवलयानन्द is nothing else but more or less a commentary upon अर्थालङ्कार portion.

( 4 ) प्रद्योतनभट्ट AND HIS COMMENTARY शरदागम.

शरदागम, otherwise known as चन्द्रालोकप्रकाश, is the oldest commentary, so far known. अप्पयदीक्षित, made much use of this Commentary in writing his कुवलयानन्द, as he himself gratefully speaks of it[1]. It is brief but clear and touches only those portions which require elucidation.

The author of this Commentary was पद्मनाभभट्टाचार्य[2],

---

1. चन्द्रालोको विजयतां शरदागमसम्भवः ।
हृद्यः कुवलयानन्दो यत् प्रसादादभूदयम् ॥
वैद्यनाथतत्सत् did not know that शरदागम was a Commentary when he said शरदागमसंज्ञकश्चन्द्रालोकमूलभूतो ग्रन्थः । See कुवलयानन्द, p. 188.

2. About प्रद्योतनभट्टाचार्य, for other and fuller information, see Pandit Gopinath Kaviraja's Introduction to किरणावलीभास्कर, The Princess of Wales Saraswati Bhavana Texts, No. 1,

son of बलभद्र. He is indifferently called 'मिश्र' and 'भट्टाचार्य' in his works. He hailed from Eastern India and probably belonged to मिथिला. He was patronised by वीरभद्रदेव, the Maharaja of Rewa, and the author of कन्दर्पचूडामणि[1]. The distinguished title of सकलशास्त्रारविन्दप्रद्योतन, was conferred upon him, most probably by his royal patron. It is for this reason that in the Colophons of many of his works, he is variously called, vry प्रद्योतनभट्ट, प्रद्योतभट्ट, प्रद्योतभट्टाचार्य or प्रद्योतनभट्टाचार्य ।

It is not at all difficult to determine the date of प्रद्योतनभट्ट. He wrote his शरदागम, it is said, in 1583 A. C[2]. His patron Maharaja वीरभद्रदेव wrote his कन्दर्पचूडामणि in 1633 A. V. ( 1576 A. C. )[3] So the later half of the 16th century may be fairly taken to be the period of his literary activity.

He was an extensive writer and wrote a large number of works, dealing with the topics of न्याय, वेदान्त and वैशेषिक[4]. *As far as we know,' his literary works are* only two. One is the वीरभद्रचम्पू and the other is शरदागम published herewith.

---

1 कन्दर्पचूडामणि, published under the authority of His Highness the Maharaja Saheb of Rewa in 1908. See the first अध्याय as well as वंशानुक्रम given there, for information about the geneaology of the ruling princes of the Rewa state.

2. Many scholars have mentioned this date but they have not given any reference to the source of information. Perhaps some MSS. give this date.

3 हरलोचनहरलोचनरसशशिभिर्विश्रुते समये ।
फाल्गुनशुक्लप्रतिपदि पूर्णो ग्रन्थः स्मरस्मेरः ॥ कन्दर्पचूडामणि 7.2.49

4. See Pandit Gopinath Kaviraja's Introduction to किरणावलीभास्कर,

॥ श्रीः ॥

# प्रस्तावना

अथैनं "चन्द्रालोकप्रकाश" इत्य 'शरदागम' नामान्तराविभूषित-तिलकान्वितं चन्द्रालोकं सुसंमुद्य पाठकमहाभागानां करकमलयोरुपहृ-रतां नः प्रमोदमेदुरं भवति मानसम् । यद्यपि चन्द्रालोकोऽनेकवारमने-काभिरपराभिष्टीकाभिः सह प्राकाश्यत, तथाऽपि श्रीमत्पद्मनाभमिश्रवि-रचितचन्द्रालोकप्रकाशापराख्यशरदागमटीकासहितस्य तस्येदं प्रथम-मेव संस्करणमिति न पौनरुक्त्येन नीरसीभवति नः प्रयासः ।

## चन्द्रालोकः

चन्द्रालोकस्तावद् संस्कृतसाहित्यग्रन्थेषु सविशेषमास्पदं भजत इति न तिरोहितं केषाञ्चिदप्यालङ्कारिकधुरीणानाम् । अत्र हि काव्यप्रका-शसरण्या काव्यलक्षणमारभ्याऽलङ्कारान्ताः सर्वेऽपि विषयाः सम्यङ् नि-वेशिताः, दण्डिभामहादिवत्स्वनिर्मितान्येवोदाहरणानि सर्वत्र सुनिरू-पितानि । अल्पाक्षरां बह्वर्थां सरणिमनुसरन्नेतन्निर्माता तथाविधशब्द-सौष्ठवविषयगाम्भीर्यलाघवाद्यैर्गुणरत्नैरिदं ग्रन्थरत्नं जग्रन्थ, यथा सा-हित्यवर्त्मनि विजिहीर्षवः सर्वेऽपि सर्वादौ चन्द्रालोकमेव शरणीकुर्वन्ति । किं बहुना, चन्द्रालोकस्य तथाविधेन मनोहारित्वेनैव समाकृष्टोऽनेक-प्रबन्धनिर्माताऽप्यप्पय्यदीक्षितोऽस्याऽर्थालङ्कारप्रकरणं क्वचित् क्वचि-देव कियता परिवर्त्तनेन सङ्कलय्य 'कुवलयानन्द' नाम्ना प्राचीकशत् ।

## चन्द्रालोकनिर्माता जयदेवः

चन्द्रालोकनिर्माता जयदेवस्तु[1] 'पीयूषवर्ष' इत्युपपदेन समलङ्कृतो

---

( १ ) चन्द्रालोकस्य प्रतिमयूखमन्तेऽसौ श्लोको दृश्यते—

महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
अनेनासावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १।१६

( २ ) हंहो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान्—

गीयते । एतदुक्तिस्रवदमन्दामृतसन्दोहमास्वदतां रसिकानां मतमनुवदन्तो वयं 'पीयूषवर्ष' इत्युपपदमन्वर्थमेव मन्यामहे । न साम्प्रतिकानामिव निरक्षरगोष्ठीप्रदत्तमननुगतार्थमुपपदम् । आधुनिकास्त्वनधिगतबिन्दवोऽपि साहित्यसिन्धवो व्यपदिश्यन्त इत्यहो कालमहिमा ।

अथेदानीमिदमत्रानुसन्धानीयं, 'यत्कोऽसौ जयदेवः ? कुत्रत्यः ? कस्मिन् समये च समुत्पन्नः' ? इति । आफ्रेखूमहाशयेन स्वकीये महासूचीपत्रे पञ्चदशाधिकसङ्ख्याका जयदेवाः समुपन्यस्ताः । चन्द्रालोकग्रन्थे तत्कर्त्रा स्वयमुल्लिखितयोस्तत्पित्रोर्नामनी एव तस्य जयदेवान्तरव्यवच्छेदे निमित्तीभवतः । महादेव इति पितुः सुमित्रेति च मातुर्नाम प्रतिमयूखमन्ते निर्दिष्टं कविना । 'प्रसन्नराघव' नाटककर्तुर्जयदेवस्याऽपि तावेव पितरौ । केचित् गीतगोविन्दकर्तारं चन्द्रालोककर्त्तारं चैकमेव ब्रुवते, ते निःसंशयं भ्रान्ताः, यतः गीतगोविन्दकर्त्रा जयदेवेन स्वपित्रोर्भोजदेवरामादेवीतिनामनी स्वयमेवोपन्यस्ते इति मिथो भिन्नाविमाबुभाविति स्पष्टमेव । नैकविधन्यायनिबन्धनिर्माता पक्षधरमिश्राऽपराभिधानोऽयमेव जयदेव इति केचिदाचक्षते, प्रबलप्रमाणाभावात्सन्दिग्धोऽयमर्थ इति तथा वक्तुं न वयमुत्सहामहे ।

## जयदेवस्य समयः

इतरेषां ग्रन्थकृतामिव जयदेवस्याऽपि समयनिर्णयो बाह्यैरेव प्रमाणैः

---

रे रे स्वैरिणि निर्विचारकविते मास्मत् प्रकाशीभव ।
उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे—
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥ १।२

( १ ) कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो—
स्यासीदातिथ्यं न किमिह महादेवतनयः ।
अपिच—
लक्ष्मणस्येव यस्यास्य सुमित्राकुक्षिजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥ १।१४-१५ ।

( २ ) श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु (गीतगोविन्द१२।११)

साधयितुं शक्यो नाऽऽभ्यन्तरैः । तानि च प्रमाणान्यधः प्रदर्शयामः—

जयदेवेन काव्यलक्षणप्रकरणे—

अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ।

इति वदता श्रीमन्मम्मटाचार्यमतमाधिक्षिप्तम्, इत्यतोऽस्य श्रीमम्मटाचार्यानन्तरभावित्वं स्पष्टम् । एवमेव आलङ्कारिकेषु सर्वप्राथम्येन विकल्पविचित्रालङ्कारयोर्लक्षणे रुय्यकेन अलङ्कारसर्वस्वे प्रदर्शिते । 'तुल्यबलविरोधो विकल्पः, स्वविपरीतफलनिष्पत्तये प्रयत्नो विचित्रम्' इत्यलङ्कारसर्वस्वोक्ते लक्षणे । जयदेवेन तु ते एव लक्षणे पूर्वापेक्षया सम्यक् परिष्कृत्य प्रदर्शिते । यथा—विरोधे तुल्यबलयोर्विकल्पालङ्कृतिर्मता । विचित्रं तत्प्रयत्नश्चेद्विपरीतः फलेच्छया । इति ।

किञ्च मम्मटेनैकाधिकषष्टिरेव, रुय्यकेन पञ्चाधिकसप्ततिरेव, जयदेवेन तु शतमलङ्काराः प्रदर्शिता इति क्रमवृद्धिं पश्यन्तो वयं मम्मटरुय्यकानन्तरभावित्वं जयदेवस्य बाढं साधयामः । रुय्यकस्य समयस्तु विक्रमशकस्य त्रयोदशशताब्द्या मध्यभागः । अलङ्कारशेखरकृता केशवमिश्रेण स्वग्रन्थे यस्य जयदेवस्योल्लेखः कृतः सोऽयमेवाऽन्यो वेति निश्चेतुमशक्यम् । किन्तु 'कदली कदली करभः करभः' इति प्रसन्नराघवीयं पद्यं यदुपन्यस्तम्, तत्तु प्रकृतजयदेवस्यैवेति निर्विवादम् । केशवमिश्रसमयस्तु विक्रमशकस्य षोडशी शताब्दी । इत्थं च तत्पूर्वभावित्वमस्य स्पष्टमेव । प्रकृतसंस्करणे संमुद्रितस्य शरदागमस्य निर्माता पद्मनाभमिश्रः १६४० विक्रमशके शरदागमं निर्मितवानिति प्रसिद्धेस्तत्समयात्पूर्वभावित्वं चन्द्रालोकस्य वक्तव्यमेव । शार्ङ्गधरपद्धतौ च प्रसन्नराघवात्कतिपयानि पद्यानि समुद्धृतानि सन्ति । शार्ङ्गधरसमयश्च विक्रमशकस्य चतुर्दशशतकारम्भः । किञ्च शार्ङ्गधरात्प्रायस्त्रिंशद्वर्षपूर्वभावी रसार्णवसुधाकरकर्ता शिङ्गभूपालः स्वग्रन्थे प्रसन्नराघवं नामग्राहं द्विवारमुदलिखत् । एतावता विक्रमशकस्य त्रयोदशशताब्द्यां जयदेवस्य स्थितिकालः कल्पयितुं शक्यः ।

## चन्द्रालोकस्य टीकाः ।

चन्द्रालोको रचनासौन्दर्येणार्थगाम्भीर्येण लघुशरीरतया च साहित्या-ध्वन्येषु प्रकृष्टां प्रतिष्ठामधिगतवानिति तदुपरि बहुभिर्विद्वद्भिरनेकाष्टीका अपि निरमायिषत, तासु नामतो रूपतश्च समुपलब्धा अधोनिर्दिष्टाः । यथा—

( १ ) चन्द्रालोकप्रकाशः अथवा शरदागमः पद्मनाभमिश्रापरा-भिधानप्रद्योतनभट्टविरचितः ।

( २ ) रमा=वैद्यनाथपायगुण्डेविरचिता ।

( ३ ) राकागमः सुधा वा विश्वेश्वरापराभिधानगागाभट्टविरचितः ।

( ४ ) बाजचन्द्रचन्द्रिका=बाजबहादुरभूपतिनाम्ना गागाभट्टेनैव-प्रणीता । इतोऽन्या अपि चन्द्रालोकदीपिका, ६ निगूढार्थदीपिका, ७ शारदशर्वरीत्याद्याष्टीका नामत उपलभ्यन्ते । या अद्याप्यमुद्रिता एव सन्ति ।

चन्द्रालोकस्यार्थालङ्कारप्रकरणं विशेषतो लोके प्रसृतमासीदित्यनु-मीयते । अप्पय्यदीक्षितस्य कुवलयानन्दोऽपि चन्द्रालोकस्यार्थालङ्कार-प्रकरणमेव कियताऽपि विपर्यासेन सम्पादितमस्तीत्युक्तमेव प्राक् ।

## पद्मनाभमिश्रः—शरदागमश्च ।

शरदागमः चन्द्रालोकप्रकाश इति नामान्तरेणाऽपि प्रसिद्धः, च-न्द्रालोकस्य सर्वतः प्राचीना इयमेव टीकेति वक्तुं सुकरम् । अप्पय्य-दीक्षितेन कुवलयानन्दनिर्माणावसरे शरदागमः शश्वदनुशीलित इति 'च-न्द्रालोको विजयतां **शरदागमसम्भवः** । हृद्यः कुवलयानन्दो य त्प्रसादादभूदयम्' । इत्युल्लिखता स्पष्टमेवाऽभिहितम् । कुवलयानन्द-टीकाकृत्तत्सद्वैद्यनाथस्तु टीकायां 'शरदागमश्चन्द्रालोकमूलभूतो ग्रन्थ' इति लिखन् शरदागमं नामतो रूपतश्चाविदन्नेव भ्रान्तो लक्ष्यत इत्युपेक्ष्यः ।

शरदागमनिर्माता श्रीमान् पद्मनाभमिश्र', बलभद्रमिश्रस्य पुत्रः । एतन्नाम्नि मिश्रभट्टाचार्येत्युपाधिद्वयं संलग्नं दृश्यते । मिथिलाभिजनो मै-थिलो ब्राह्मणोऽयमिति वक्तुं शक्यम् । अयं च कन्दर्पचूडामणिकर्तुर्बे,

वेलखण्डमण्डनरीवाधीश्वरस्य श्रीवीरभद्रदेवभूपतेः सभायां प्रधानपण्डित आसीत् । अनेन स्वपितुर्बलभद्रमिश्रस्य ग्रन्थेषु प्रायष्टीका निर्मिताः सन्ति । वीरभद्रभूपतिर्विद्वद्रत्नेऽस्मिन् सविशेषमादरं स्नेहं च वहति स्म । अयमपि स्वकृतिषु प्रायस्तं मुहुर्मुहुः स्तौति स्म । प्रशस्तपादभाष्यटीकायां 'सेतु' नामिकायामनेन वीरभद्रदेवः सविशेषं स्तुतः । अयं च बलभद्रमिश्रस्य द्वितीयः पुत्र आसीत् । प्रथमः पुत्रो विश्वनाथनामा, यद्विषये न किमप्यधिकमुपलभ्यते । पद्मनाभस्य कनीयान् भ्राता गोवर्द्धनः, यः पद्मनाभादेव शास्त्राण्यधिगम्य केशवमिश्रकृततर्कभाषायाः, अन्नंभट्टकृततर्कसङ्ग्रहस्य च टीके विरचयामास ।

पद्मनाभश्च स्वस्य लोकोत्तरपाण्डित्यानुभावेन 'सकलशास्त्रारविन्दप्रद्योतनभट्टाचार्य' इत्युपाधिमधिगतवान् । यश्चैतदीयग्रन्थान्तपुष्पिकासु बहुश उपलभ्यते । प्रद्योतनभट्टाचार्य इति प्रद्योतभट्टाचार्य इत्येव वाऽस्य नाम बहुलं प्रसिद्धमासीत् ।

## एतन्निर्मिता ग्रन्थाः ।

( क ) न्याये—

( १ ) चिन्तामणिपरीक्षा (गङ्गेशस्य तत्त्वचिन्तामणेष्टीका)

( ख ) वैशेषिके—

( १ ) कणादरहस्यम् (स्वकृतराद्धान्तमुक्ताहाराख्यग्रन्थटीका)

( २ ) वर्द्धमानेन्दुः (वर्द्धमानस्य द्रव्यकिरणावलीप्रकाशटीका)

( ३ ) किरणावलीभास्करः

( ४ ) वैशेषिकसेतुः (प्रशस्तपादभाष्यटीका)

( ५ ) न्यायकन्दलीटीका

( ग ) वेदान्ते—

( १ ) खण्डनखण्डखाद्यटीका

( घ ) साहित्ये—

( १ ) वीरभद्रदेवचम्पूः

( २ ) शरदागमः-(चन्द्रालोकप्रकाशः)

वीरभद्रभूपतिना (हरलोचनहरलोचनरसशशिभिर्विश्रुते समये) संवत १६३३ समये कन्दर्पचूडामणिर्विरचितः, पद्मनाभमिश्रेणाऽपि प्रायस्तस्मिन्नेव वत्सरे वीरभद्रदेवचम्पूरपि निरमायीति, शरदागमस्याऽपि तदन्तिक एव समयो ऽभ्युपगन्तव्यः ।

प्रकृतग्रन्थप्रकाशनाय शरदागमस्यैकमेवादर्शपुस्तकं काशीस्थराजकीयपुस्तकालयादधिगत्य तदाधारेणैव वृत्तमिदं संस्करणम् । तस्य च पुस्तकस्याशुद्धिबहुलतया ऽऽदर्शान्तरस्य चाभावेन सन्दिग्धेषु प्रश्नचिह्नविनिवेशनं कृत्वैव विरतमस्माभिः ।

प्रायो विषमेषु स्थलेषु श्रीमद्भिः पूज्यवरैः श्रीकाशीस्थराजकीयपाठालयप्रधानाध्यक्षैः श्रीगोपीनाथकविराजमहोदयैः काशीविश्वविद्यालयसंस्कृताध्यापकैः प्राच्यप्रतीच्यविद्याकोविदैः श्रीमच्छ्रद्धेयमित्रवरश्रीबटुकनाथशर्मसाहित्योपाध्याय एम्. ए. महोदयैश्च महनीयं साहाय्यमाचरितमिति शतशो धन्यवादैस्तानभिनन्दामः । आङ्ग्लभाषायां संस्कृतभाषायां च भूमिकालिखने तु श्रीमन्मित्रवरबटुकनाथशर्मणां सर्वाङ्गीणं साहाय्यमन्तरा दुस्सम्पादमेवासीदिदमिति तदर्थं तान् कैः शब्दैरभिनन्दानीति न वेद्मि ।

पर्यवसाने पाठकमहाभागान् इदमेव साञ्जलिबन्धमभ्यर्थये, यत्तैर्मानुष्यसुलभदोषपराङ्मुखैः प्राचीनग्रन्थावलोकनसदयदृष्टिभिर्न दोषैकदृष्टिभिर्भवितव्यमिति ।

काशीस्थराजकीय पुस्तकालयः
सरस्वतीभवनम् । काशी ।
हरिशयनी, एकादशी, संवत् १९८६

नारायणशास्त्री खिस्ते

॥ श्रीः ॥

शरदागमसहितचन्द्रालोकस्य

# विषयानुक्रमणिका ।

## प्रथममयूखे


| | पृ० |
|---|---|
| मङ्गलाचरणम् | १ |
| मूले टीकायां च | |
| टी० बघेलाभिधवंशानुवर्णनम् | २ |
| मू० ग्रन्थावतरणम् | ३ |
| मू० काव्यहेतुप्रतिभानिरूपम् | ४ |
| ,, काव्यलक्षणानिरूपणम् | ,, |
| मू० क्वचिदनलङ्कारत्वेऽपि न दोष इति काव्यलक्षणे एकदेशि-मतदूषणम् | ५ |
| मू० शब्दप्रभेदनिरूपणम् | ५ |
| ,, रूढयौगिकतन्मिश्रत्वप्रभेदैस्तस्य त्रिधात्वकथनम् | ५ |
| ,, तत्राऽऽद्यस्य सोदाहरणं प्रकारत्रयकथनम | ५ |
| ,, द्वितीयस्य सोदाहरणं प्रकारत्रयकथनम् | ६ |
| ,, तृतीयस्य सोदाहरणं निरूपणम् | ६-७ |
| ,, पदस्य लक्षणम् | ७ |
| ,, खण्डवाक्यस्य लक्षणम | ७ |
| ,, उभयोरुदाहरणम् | ८ |


प्रथममयूखसमाप्तिः ।

## द्वितीयमयूखे


| | |
|---|---|
| मूले दोषसामान्यलक्षणम् | ९ |
| ,, श्रुतिकटुलक्षणम् | ,, |
| ,, सोदाहरणं च्युतसंस्कृतिलक्षणम् | ,, |
| ,, ,, अप्रयुक्तलक्षणम् | ,, |
| ,, ,, असमर्थलक्षणम् | ,, |
| ,, ,, निहतार्थलक्षणम् | १० |
| ,, ,, निरर्थकलक्षणम् | १० |
| ,, ,, अवाचकलक्षणम् | ,, |

| | | | पृ० |
|---|---|---|---|
| मू० | सोदाहरणं | त्रिविधाश्लीललक्षणम् | १०-११ |
| " | " | सन्दिग्धलक्षणम् | ११ |
| " | " | अप्रतीतलक्षणम् | " |
| " | " | शिथिललक्षणम् | " |
| " | " | ग्राम्यलक्षणम् | " |
| " | " | नेयार्थलक्षणम् | " |
| " | " | क्लिष्टलक्षणम् | " |
| " | " | अविमृष्टविधेयांशलक्षणम् | १२ |
| " | " | विरुद्धमतिकृल्लक्षणम् | " |
| " | " | अन्यसङ्गतलक्षणम् | " |
| " | " | प्रतिकूलाक्षरलक्षणम् | " |
| " | " | उपहतविसर्गलुप्तविसर्गयोर्लक्षणे | १२ |
| " | " | कुसन्धिलक्षणम् | १२ |
| " | " | हतवृत्तलक्षणम् | १३ |
| " | " | न्यूनाधिकयोर्लक्षणे | " |
| " | " | विकृतलक्षणम् | " |
| " | " | पतत्प्रकर्षलक्षणम् | " |
| " | " | समाप्तपुनरात्तलक्षणम् | " |
| " | " | अर्धान्तरपदाक्षेपिलक्षणम् | १४ |
| " | " | अभवन्मतयोगलक्षणम् | १४ |
| " | " | अस्थानस्थसमासलक्षणम् | " |
| " | " | सङ्कीर्णलक्षणम् | " |
| " | " | भग्नप्रक्रमलक्षणम् | १५ |
| " | " | अक्रमलक्षणम् | " |
| " | " | अमतार्थान्तरलक्षणम् | " |
| " | " | अपुष्टार्थलक्षणम् | " |
| " | " | कष्टलक्षणम् | १६ |
| " | " | व्याहतलक्षणम् | " |
| " | " | दुष्क्रमग्राम्यसन्दिग्धानां लक्षणानि | १६ |
| " | " | अनौचित्यलक्षणम् | १६ |
| " | " | द्विविधविरुद्धलक्षणम् | १६-१७ |
| " | " | सामान्यपरिवृत्तिलक्षणम् | १७ |
| " | " | विशेषपरिवृत्तिलक्षणम् | " |

| | | पृ० |
|---|---|---|
| मू० सोदाहरणं सहचराचारुविरुद्धान्योन्यसङ्गत्योर्लक्षणे | | १७ |
| ,, ,, | दोषाश्रयनिरूपणम् | १७ |
| ,, ,, | त्रिविधदोषाङ्कुशनिरूपणम् | १७-१८ |


द्वितीयमयूखसमाप्तिः

---

तृतीयमयूखे।


| | | |
|---|---|---|
| मू० सोदाहरणमक्षरसंहतिनिरूपणम् | | १८ |
| ,, ,, | शोभानिरूपणम् | ,, |
| ,, ,, | अभिमाननिरूपणम् | ,, |
| ,, ,, | हेतुनिरूपणम् | ,, |
| ,, ,, | प्रतिषेधनिरूपणम् | २० |
| ,, ,, | निरुक्तलक्षणम् | ,, |
| ,, ,, | मिथ्याध्यवसायनिरूपणम् | ,, |
| ,, ,, | सिद्धिनिरूपणम् | ,, |
| ,, ,, | युक्तिनिरूपणम् | ,, |
| ,, ,, | कार्यनिरूपणम् | २१ |
| ,, ,, | लक्षणोपसंहारः | ,, |


तृतीयमयूखसमाप्तिः

---

चतुर्थमयूखे


| | | |
|---|---|---|
| मू० सोदाहरणं श्लेषनिरूपणम् | | २२ |
| ,, ,, | प्रसादनिरूपणम् | ,, |
| ,, ,, | समतानिरूपणम् | ,, |
| ,, ,, | समाधिनिरूपणम् | २३ |
| ,, ,, | माधुर्यनिरूपणम् | ,, |
| ,, ,, | ओजोनिरूपणम् | ,, |
| | सौकुमार्यनिरूपणम् | २३-२४ |
| ,, ,, | उदारतानिरूपणम् | २४ |
| | कान्त्यर्थव्यक्त्योरुक्तगुणान्तर्भावकथनम् | ,, |
| | भूषणनिरूपणम् | २५ |


चतुर्थमयूखसमाप्तिः

---

पञ्चममयूखे


| | |
|---|---|
| मू० अलङ्कारसामान्यलक्षणम् | २६ |

| | | | पृ० |
|---|---|---|---|
| मू० | सोदाहरणं | छेकानुप्रासलक्षणम् | २६ |
| ,, | | वृत्त्यनुप्रासलक्षणम् | २७ |
| ,, | ,, | लाटानुप्रासलक्षणम् | ,, |
| ,, | ,, | स्फुटानुप्रासलक्षणम् | ,, |
| ,, | ,, | अर्थानुप्रासलक्षणम् | ,, |
| ,, | ,, | पुनरुक्तप्रतीकाशलक्षणम् | २८ |
| ,, | ,, | यमकलक्षणम् | ,, |
| ,, | ,, | चित्रलक्षणम् | ,, |
| ,, | ,, | उपमालक्षणम् | २९ |
| ,, | ,, | अनन्वयलक्षणम् | ,, |
| ,, | ,, | उपमेयोपमालक्षणम् | ,, |
| ,, | ,, | प्रतीपोपमालक्षणम् | २९ |
| ,, | ,, | ललितोपमालक्षणम् | ,, |
| ,, | ,, | स्तबकोपमालक्षणम् | ३० |
| ,, | ,, | सम्पूर्णोपमालक्षणम् | ,, |
| ,, | ,, | रूपकलक्षणम् | ,, |
| ,, | ,, | सोपाधिरूपकलक्षणम् | ,, |
| ,, | ,, | सादृश्यरूपकलक्षणम् | ३१ |
| ,, | ,, | आभासरूपकलक्षणम् | ,, |
| ,, | ,, | रूपितरूपकलक्षणम् | ,, |
| ,, | ,, | परिणामलक्षणम् | ,, |
| ,, | ,, | उल्लेखलक्षणम् | ,, |
| ,, | ,, | अपह्नुतिलक्षणम् | ३२ |
| ,, | ,, | पर्यस्तापह्नुतिलक्षणम् | ,, |
| ,, | ,, | भ्रान्तापह्नुतिलक्षणम् | ,, |
| ,, | ,, | छेकापह्नुतिलक्षणम् | ३३ |
| ,, | ,, | कैतवापह्नुतिलक्षणम् | ,, |
| ,, | ,, | उत्प्रेक्षालक्षणम् | ,, |
| ,, | ,, | गूढोत्प्रेक्षालक्षणम् | ,, |
| ,, | ,, | स्मृति-भ्रान्ति-सन्देहलक्षणानि | ३३-३४ |
| ,, | ,, | मीलितलक्षणम् | ३४ |
| ,, | ,, | सामान्यलक्षणम् | ,, |
| ,, | ,, | उन्मीलितलक्षणम् | ,, |

| | | | पृ० |
|---|---|---|---|
| मू० | सोदाहरणं | अनुमानलक्षणम् | ३४ |
| ,, | ,, | अर्थापत्तिलक्षणम् | ३४-३५ |
| ,, | ,, | काव्यलिङ्गलक्षणम् | ३५ |
| ,, | ,, | परिकरलक्षणम् | ,, |
| ,, | ,, | परिकराङ्कुरलक्षणम् | ,, |
| ,, | ,, | अक्रमातिशयोक्तिलक्षणम् | ,, |
| ,, | ,, | अत्यन्तातिशयोक्तिलक्षणम् | ३६ |
| ,, | ,, | भेदकातिशयोक्तिलक्षणम् | ,, |
| ,, | ,, | रूपकातिशयोक्तिलक्षणम् | ,, |
| ,, | ,, | प्रौढोक्तिलक्षणम् | ,, |
| ,, | ,, | सम्भावनालक्षणम् | ३७ |
| ,, | ,, | प्रहर्षणलक्षणम् | ,, |
| ,, | ,, | विषादनलक्षणम् | ,, |
| ,, | ,, | तुल्ययोगितालक्षणम् | ,, |
| ,, | ,, | दीपकलक्षणम् | ,, |
| ,, | ,, | आवृत्तिदीपकलक्षणम् | ,, |
| ,, | ,, | प्रतिवस्तूपमालक्षणम् | ३७-३८ |
| ,, | ,, | दृष्टान्तलक्षणम् | ३८ |
| ,, | ,, | निदर्शनालक्षणम् | ३९ |
| ,, | ,, | व्यतिरेकलक्षणम् | ,, |
| ,, | ,, | सहोक्तिलक्षणम् | ,, |
| ,, | ,, | विनोक्तिलक्षणम् | ३९ |
| ,, | ,, | समासोक्तिलक्षणम् | ,, |
| ,, | ,, | खण्डश्लेषलक्षणम् | ४० |
| ,, | ,, | भङ्गश्लेषलक्षणम् | ,, |
| ,, | ,, | अर्थश्लेषलक्षणम् | ,, |
| ,, | ,, | अप्रस्तुतप्रशंसालक्षणम् | ४०-४१ |
| ,, | ,, | अर्थान्तरन्यासलक्षणम् | ४१ |
| ,, | ,, | विकस्वरलक्षणम् | ,, |
| ,, | ,, | पर्यायोक्तिलक्षणम् | ,, |
| ,, | ,, | व्याजस्तुतिलक्षणम् | ,, |
| ,, | ,, | आक्षेपलक्षणम् | ४२ |
| ,, | ,, | गूढाक्षेपलक्षणम् | ,, |

| | | | पृ० |
|---|---|---|---|
| मू० | सोदाहरणं | विरोधलक्षणम् | ४२ |
| ,, | ,, | विरोधाभासलक्षणम् | ४२-४३ |
| ,, | ,, | असम्भवलक्षणम् | ४३ |
| ,, | ,, | विभावनालक्षणम् | ,, |
| ,, | ,, | विशेषोक्तिलक्षणम् | ,, |
| ,, | ,, | असङ्गतिलक्षणम् | ,, |
| ,, | ,, | विषमलक्षणम् | ४४ |
| ,, | ,, | समलक्षणम् | ,, |
| ,, | ,, | विचित्रलक्षणम् | ,, |
| ,, | ,, | अधिकलक्षणम् | ,, |
| ,, | ,, | अन्योन्यलक्षणम् | ,, |
| ,, | ,, | विशेषलक्षणम् | ४५ |
| ,, | ,, | व्याघातलक्षणम् | ४५ |
| ,, | ,, | कारणमालालक्षणम् | ,, |
| ,, | ,, | एकावलीलक्षणम् | ,, |
| ,, | ,, | मालादीपकलक्षणम् | ४६ |
| ,, | ,, | सारलक्षणम् | ,, |
| ,, | ,, | उदारसारलक्षणम् | ,, |
| ,, | ,, | यथासंख्यलक्षणम् | ४६-४७ |
| ,, | ,, | पर्यायलक्षणम् | ४७ |
| ,, | ,, | परिवृत्तिलक्षणम् | ,, |
| ,, | ,, | समुच्चयलक्षणम् | ,, |
| ,, | ,, | समाधिलक्षणम् | ,, |
| ,, | ,, | प्रत्यनीकलक्षणम् | ४८ |
| ,, | ,, | प्रतीपलक्षणम् | ,, |
| ,, | ,, | उल्लासलक्षणम् | ,, |
| ,, | ,, | तद्गुणलक्षणम् | ,, |
| ,, | ,, | पूर्वरूपलक्षणम् | ,, |
| ,, | ,, | अतद्गुणलक्षणम् | ४९ |
| ,, | ,, | अनुगुणलक्षणम् | ,, |
| ,, | ,, | अवज्ञालक्षणम् | ,, |
| ,, | ,, | उत्तरलक्षणम् | ,, |
| ,, | ,, | पिहितलक्षणम् | ४९-५० |

| | पृ० |
|---|---|
| मू० सोदाहरणं व्याजोक्तिलक्षणम् | ५० |
| ,, ,, वक्रोक्तिलक्षणम् | ,, |
| ,, ,, स्वभावोक्तिलक्षणम् | ,, |
| ,, ,, भाविकलक्षणम् | ५०-५१ |
| ,, ,, भाविकच्छविलक्षणम् | ५१ |
| ,, ,, उदात्तलक्षणम् | ,, |
| ,, ,, अत्युक्तिलक्षणम् | ,, |
| ,, ,, केषांचिन्मते रसवत्प्रेयऊर्जस्विसमाहित-भावोदयभावसन्धिभावशबलताख्याः सप्तालङ्काराः | ५-५१ |
| शुद्ध्यादीनां चतुर्णामलङ्कारान्तरत्वनिरासः | ५२-५३ |
| अन्येषामप्यतिशयोक्त्यन्तर्भावकथनम् | ५३ |


पञ्चममयूखसमाप्तिः

षष्ठमयूखे


| | |
|---|---|
| ,, विभावानुभावादीनां कारणकार्यत्वकथनम् | ५५ |
| ,, रसस्वरूपनिर्वचनम् | ,, |
| ,, शृङ्गारस्वरूपनिर्वचनम् | ५५-५६ |
| ,, सम्भोगविप्रलम्भात्मकभेदद्वयकथनम् | ५६ |
| टी० सम्भोगविप्रलम्भोदाहरणे | ५६-५७ |
| मू० हास्यरसस्वरूपनिर्वचनम् | ५६ |
| टी० हास्यरसोदाहरणम् | ५७ |
| मू० करुणरसस्वरूपनिर्वचनम् | ,, |
| टी० करुणरसोदाहरणम् | ,, |
| मू० रौद्ररसस्वरूपनिर्वचनम् | ,, |
| टी० रौद्ररसोदाहरणम् | ,, |
| मू० वीररसस्वरूपनिर्वचनम् | ५८ |
| टी० वीररसोदाहरणम् | ,, |
| मू० भयानकरसस्वरूपनिर्वचनम् | ,, |
| टी० भयानकरसोदाहरणम् | ,, |
| मू० बीभत्सरसस्वरूपनिर्वचनम् | ,, |
| टी० बीभत्सरसोदाहरणम् | ,, |

| | पृ० |
|---|---|
| मू० अद्भुतरसस्वरूपनिर्वचनम् | ५८ |
| टी० अद्भुतरसोदाहरणम् | ५९ |
| मू० शान्तरसस्वरूपनिर्वचनम् | ,, |
| टी० शान्तरसोदाहरणम् | ,, |
| मू० भावस्वरूपनिर्वचनम् | ,, |
| टी० भावोदाहरणम् | ५९-६० |
| टी० रसाभासभावाभासादीनामुदाहरणानि | ६०-६१ |
| मू० व्यभिचारिभावपरिगणनम् | ५९-६० |
| मू० रीतीनां नामग्राहं निरूपणम् | ६१-६३ |

षष्ठमयूखसमाप्तिः

## सप्तममयूखे

| | |
|---|---|
| मू० भारत्याः शक्तिलक्षणाव्यञ्जनाभेदेन त्रैविध्यकथनम् | ६४ |
| ,, व्यञ्जनास्वरूपनिर्वचनम् | ,, |
| मू० ध्वनिभेदप्रभेदप्रपञ्चनम् | ,, |
| टी० ध्वनिभेदप्रभेदोदाहरणानि | ६५-६८ |
| मू० व्यङ्ग्यस्य विभागान्तरनिरूपणम् | ६८-७० |
| टी० व्यङ्ग्यविभागान्तरोदाहरणानि | ६८-७० |

सप्तममयूखसमाप्तिः

## अष्टममयूखे

| | |
|---|---|
| मू० ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदकथनम् | ७१ |
| ,, गुणीभूतव्यङ्ग्यस्य सामान्यतस्त्रैविध्यकथनम् | ७१ |
| ,, अगूढव्यङ्ग्यादीनामष्टप्रभेदानां सोदाहरणं निर्वचनम् | ७१-७३ |

अष्टममयूखसमाप्तिः

## नवममयूखे

| | |
|---|---|
| लक्षणासामान्यलक्षणम् | ७४ |
| सोदाहरणं लक्षणाभेदप्रभेदप्रपञ्चनम् | ७४-७९ |

नवममयूखसमाप्तिः

## दशममयूखे

| | |
|---|---|
| अभिधास्वरूपनिर्वचनपूर्वकं तस्याः सोदाहरणं षड्विधत्वकथनम् | ८०-८२ |

दशममयूखसमाप्तिः

॥ श्रीः ॥

पीयूषवर्षश्रीजयदेवकविकृतः

# चन्द्रालोकः

श्रीप्रद्योतनभट्टाचार्यकृत
चन्द्रालोकप्रकाशाऽपराभिधानशरदागमटीकान्वितः ।

## प्रथमो मयूखः ।

उच्चैरस्यति मन्दतामरसतां जाग्रत्कलङ्कैरव-
ध्वसं हस्तयते च या सुमनसामुल्लासिनी मानसे ।
धृष्टोद्यन्मदनाशनार्चिरमला लोकत्रयीदर्शिका
सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु ॥ १ ॥

॥ श्रीः ॥

पृथ्वी पृथ्वी न पद्भ्यां न च वहति नभस्तुङ्गतामुत्तमाङ्गात्
पणिप्रक्षेपयोग्यं दधति दश दिशः किञ्च नैवाऽवकाशम् ॥
कुर्यां किं काऽनुकुर्यां त्रिपुरविजयिनस्ताण्डवे चिन्तयेत्थं
व्यग्रः सर्गादिहेतुस्त्रिदशगणयुतः श्रेयसे भैरवोऽस्तु ॥ १ ॥
मम सहजविरोधी निर्जितोऽनेन भित्त्वा
धनुरिति बहलोद्यत्प्रीतिभाजा स्मरेण ॥
स्रगिव कुवलयानामादरेणोपनीता
जयति जनकजाया राघवे दृष्टिवृष्टिः ॥ २ ॥

१ धृष्टोद्यन्मदनाशनार्चिरिति टीकान्तरसम्मतः पाठः ।

अस्य स्थितितो नगरी भवतोऽयोध्या भवत्याखिला ॥
इति रघुवंशादधिको जयति **बघेला**ऽभिधो वंशः ॥ ३ ॥
देवपतेरिव शक्तिर्यस्य जये भूभृतां प्रथिता ॥
**श्रीवीरभद्रदेव**स्तत्र धराऽऽखण्डलो जातः ॥ ४ ॥
दशरथतो रघुपतिरिव तस्मादिह **वीरभानुभूपालः** ॥
आबद्धधर्मसेतुर्जगति समुद्रे समुद्भूतः ॥ ५ ॥
तत्तनयो नयनिर्मलकीर्त्तिः स्वर्निम्नगामूलम् ।
जयति तदीयस्तनयः कविगोष्ठीदेवताराम: ॥ ६ ॥
क्रियते तस्य निदेशाच्च**चन्द्रालोकप्रकाशो**ऽयम् ।
**शारदागम** इति विदितो **भट्टाचार्येण** यत्नेन ॥ ७ ॥

विघ्नविध्वंसकामनया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति-

**उच्चैरिति** ॥ १ ॥ महारुद्रनेत्रपक्षे सूर्यरूपं चक्षुर्मन्दतामरसतां उच्चैः अस्यति । सूर्यस्य तामरसाह्लादकत्वात् । तस्मिन् सति तामरसे मन्दत्वासम्भवात् । चन्द्रात्मकं चक्षुर्जाग्रत्कलं यथास्यात्तथा कैरवध्वंसं हस्तयते दूरीकरोति । चन्द्रे सति कुमुदाह्लादस्य जायमानत्वात् । अग्निरूपं तु धृष्ट उद्यन् यो मदनः स एवाशनं यत्र दृगर्चिः । वाग्देवतापक्षे मन्दत्वमरसत्वं च उच्चैर्दूरीकरोति । वाग्देवताया अमन्दत्वसरसत्वयोर्भावात् । यावज्जाग्रत्कलङ्कैः प्रकटदोषैर्यो रवध्वंसः वचनाभावस्तं अपाकरोति । तस्याः प्रसादेन दोषानपास्य वचनप्रयोगस्य कर्तुं शक्यत्वात् । सदोषा गिरो भविष्यन्तीति भीत्या हि दोषाज्ञाने तन्निरासोपायाज्ञाने च वचनप्रयोगो न भवति वाग्देवताप्रसादात्तदुभयज्ञाने तु भवति निरवग्रहो वचनप्रयोग इत्यर्थः ।

---

१ वीरभद्रकारितग्रन्थान्तरपरामर्शतोऽत्रत्यप्रकरणानुसन्धानाच्चाऽत्र पञ्चमषष्ठार्ययोर्मध्ये जयतितदीयस्तनय इत्यतः पूर्वं 'रामचन्द्र' नामकनृपवर्णनपरमेकं पद्यमपेक्षितमिति प्रतिभाति ।

हं हो चिन्मयचित्तचन्द्रमणयः संवर्धयध्वं रसान्
रे रे स्वैरिणि निर्विचारकविते मास्मत्प्रकाशीभव ।
उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥ २ ॥
युक्त्यास्वाद्यलसद्रसैकवसतिः साहित्यसारस्वत-
क्षीराम्भोधिरगाधतामुपदधत्सेव्यः समाश्रीयताम् ।
श्रीरस्मादुपदेशकौशलमयं पीयूषमस्माज्जग-
ज्जाग्रद्रासुरपद्मकेशरयशःशीतांशुरस्माद् बुधाः ॥ ३ ॥

---

धृष्टा उद्यन्मदा ये ज्ञानं विनैव गर्वपर्वतभाजस्तन्नाशनाद्धिंस्तेषामस्याः प्रभावादपगमो भवतीत्यर्थः ।

वाग्देवताहरनेत्रयोरमलत्वं समानमेव । लोकप्रकाशकत्वं च ॥

वाक्पक्षे सुमनसां पण्डितानां मानसे मानसे उल्लासिनी । सूर्योदये सति यागाद्याचरणात् । वह्नौ होमाचरणात् चन्द्रेणापि देवानां तृप्त्याधानात् ॥ १ ॥

**हंहो इति** ॥२॥ चिन्मयज्ञानशालिनो ये तेषां चित्तस्वरूपाश्चन्द्रमणयः रसान् संवर्धयध्वम् । निर्विचारकविते स्वैरिणि नानाजनसाधारणत्वादस्मत्प्रकाशीभव मा । अत्रोभयं हेतुः । **चन्द्रेति** ॥ चन्द्रोदये चन्द्रमणेः क्षरणात् । अभिसारिकाभिर्गतित्यागात् । ग्रन्थस्य प्रयोजनमाह—**उल्लासायेति** ॥ विचारा एव वीचिनिचया यत्रेति तादृशालङ्कारसमुद्रस्येत्यर्थः । एतावता ऽलङ्कारसलक्षणोऽभिधेयस्तेन प्रतिपाद्यप्रतिपादकभावः सम्बन्धः रसवृद्ध्यादिश्च प्रयोजनं दर्शितमिति भावः ।

प्रयोजनकथनेन पण्डितानस्मिन्प्रवर्त्तयति—**युक्त्येति** ॥ ३ ॥ युक्तिश्चास्वाद्यलसद्रसश्च तयोरित्यर्थः । अन्यत्राऽलङ्कारग्रन्थे तादृशी

तं पूर्वाचार्यसूर्योक्तिज्योतिःस्तोमोद्गमं स्तुमः ।
यं प्रस्तूय प्रकाशन्ते मद्गुणास्त्रसरेणवः ॥ ४ ॥
नाशङ्कनीयमेतेषां मतमेतेन दूष्यते ।
किं तु चक्षुर्मृगाक्षीणां कज्जलेनेव भूष्यते ॥ ५ ॥
प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।
हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव ॥ ६ ॥
निर्दोषा लक्षणवती सरीतिर्गुणभूषणा ।
सालंकाररसाऽनेकवृत्तिर्वाक्काव्यनामभाक् ॥ ७ ॥

---

युक्तिर्नास्तीत्यर्थः । साहित्यसम्बन्धि सारस्वतमेव क्षीरमित्यर्थः । ग्रन्थान्तरापेक्षयाऽत्र गाम्भीर्यमाह—**अगाधतामिति** ॥ अत एव सेव्यः । एतादृशस्य समाश्रयणे फलमाह—**श्रीरिति** ॥ श्रीर्धनं सरसानिषेवणेन कान्तिश्च । एतत्पाठेन स्वयमन्येषां गुरुरपि भवतीत्याह—**उपदेशेति** ॥ उपदेशस्य पीयूषत्वेन शिष्याणां प्रवृत्तिरुक्ता । अन्यग्रन्थतो यशश्चन्द्रोऽप्येतत्सेवने समीचीनो भवति । **जगादिति** ॥

औद्धत्यं परिहरति—**तमिति** ॥ ४ ॥ अन्योऽपि त्रसरेणुः सूर्यकिरणे जालान्तर्गते प्रकाशत इत्यर्थः ॥

आपाततः पूर्वाचार्यमतदूषकतया प्रतीयमानाऽपि मदुक्तिरनौचितीमावहतीत्याह—**नाशङ्कनीयमिति** ॥ ५ ॥ दोषोद्भावनेन विचारकाणां तत्र सिद्धान्तस्फूर्तिर्जायमानत्वादित्यर्थः ।

काव्यहेतुमाह—**प्रतिभेति** ॥ ६ ॥ कवित्वबीजभूतः संस्कारविशेषः प्रतिभा । सैव श्रुताभ्यासावासाद्य बीजं मृदादिसहितं लतामिव कवितां सूत इत्यर्थः ।

काव्यलक्षणमाह—**निर्दोषेति** ॥ ७ ॥ अर्थोऽन्यत्र काव्यतयाऽत्र कथमुपेक्षित इति चेन्न । निर्दोषत्वेनैव सार्थकत्वलाभात् । निर-

अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ॥ ८ ॥
विभक्त्युत्पत्तये योगः शास्त्रीयः शब्द इष्यते ।
रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ॥ ९ ॥
अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधाऽऽदिमः ।
ते च वृक्षादिभूवादिमण्डपाद्या यथाक्रमम् ॥ १० ॥

---

र्थकस्य सदोषत्वात । वृत्तिर्द्विविधा । मधुरादिरूपा पञ्चधा । व्यञ्जनादिरूपा त्रिधेति । **बौधायनवृत्तावनेकत्वे** विशेषणं दोषादीनामनेकत्वं च स्वत एव ज्ञातव्यम् ।

शब्दार्थौ काव्यम् । तत्र च क्वचिदनलङ्कारत्वेपि न दोष इति कस्यचिन्मतमपाकरोति—**अङ्गीकरोतीति** ॥ ८ ॥ यः कृती अनलङ्कृती शब्दार्थौ काव्यं अङ्गीकरोति सो ऽनलमनुष्णं कस्मान्नाङ्गीकरोतीत्यन्वयः । अग्नेरनुष्णताङ्गीकारतुल्यो ऽसावङ्गीकार इत्यर्थः । अलङ्कारवदेव काव्यं तस्य तु क्वचिदस्फुटत्वे ऽपि न काव्यत्वहानिरिति तत्त्वम् ।

निर्दोषत्वादिविशेषणीभूतं निरूपयितुं विशेष्यीभूतां वाचं लक्षयति—**विभक्तीति** ॥ ९ ॥ शास्त्रीयशब्दत्वं लक्ष्यतावच्छेदकम् । भेरीशब्दादौ नाऽव्याप्तिः । एतावता लिङ्गधातुरूपा प्रकृतिः शब्दः तस्यैव विभक्तियोग्यत्वादित्यर्थः । अस्य त्रैविध्यमाह—**रूढेति** ॥ रूढो यौगिकस्तन्मिश्रश्चेत्यर्थः ।

एष्वाद्यस्त्रिविध इत्याह—**अव्यक्तेति** ॥ १० ॥ अग्रिम आद्यः । योगो ऽवयवशक्तिः रूढिः समुदायशक्तिः । तत्राऽव्यक्तयोगो रूढः । यत्र विद्यमानो ऽपि योगार्थो न प्रतीयते यथा वृक्ष इति । अत्र वृश्चत्यातपमिति विद्यमानो ऽपि योगो न प्रतीयते वृक्षत्वस्यैव प्रतीतेः । तस्य जातिरूपत्वात् ।

शुद्धतन्मूलसंभिन्नप्रभेदैर्यौगिकास्त्रिधा ।
ते च भ्रान्तिस्फुरत्कान्तिकौन्तेयादिस्वरूपिणः ॥ ११ ॥
तन्मिश्रोऽन्योन्यसामान्यविशेषपरिवर्त्तनात् ।
नीरधिः पङ्कजं सौधः सागरो भूरुहः शशी ॥ १२ ॥

---

निर्योगी यत्र योगो नै सम्भवत्येव यथा–भूवादिः ॥ अत्र पाणिनेः सङ्केतशब्दो ऽयं धातुषु । "भूवादयो धातवः" इति पाणिनिस्मरणात् ॥ न च भूरादिर्येषामिति व्युत्पत्त्या भूवादिशब्दो निष्पद्यते, भ्वादय इति प्रसङ्गात् । नाऽपि भूवाऽऽदिर्येषामित्यनया निष्पन्नोऽपि धातुप्रतिपादकः । धातुषु तदादित्वाभावात् । तस्माद्रूढ एवाऽयं शब्दः परामर्शादभिप्रायाद्धातून्प्रतिपादयतीति प्रसिद्धम् ।

योगाभासः यत्र योगार्थः प्रकृतेऽर्थे नान्वेति विद्यमानोऽपि । यथा—मण्डपशब्दस्य गृहरूपे ऽर्थे मण्डं पिबतीति योगार्थः ।

यौगिकोऽपि त्रिविध इत्याह–**शुद्धेति** ॥ ११ ॥ तत्र प्रकृतिप्रत्ययोत्पन्नः शुद्धो योगः यथा–भ्रान्त्यादिशब्दः । यौगिकशब्दयोः समासः केवलप्रकृतिनिष्पाद्यः । एतन्मूलो यौगिकमूलः । यथा–स्फुरत्कान्तिरित्यादिः । कुन्तीत्यशुद्धो योगः । कुन्तिशब्दादयौगिकनिष्पत्तेः । तन्निष्पन्नः कौन्तेयशब्दः सम्भिन्न इत्यर्थ ।

रूढयौगिकमाह–**तन्मिश्र इति** ॥ १२ ॥ विशेषस्य सामान्यतायाः सामान्यस्य विशेष्यतायाः योगरूढआश्रयणं कारणवशेनाऽन्योन्यसामान्यविशेषपरिवर्त्तमान एक एवाऽयं भेदः । तत्र नीराणि दधातीति सरःप्रभृतिसाधारणतया सामान्यस्य समुद्रपरत्वे विशेषपरिवृत्तिः पङ्कजपदे कमलादिसाधारणे कमलपरत्वे । सौधशब्दे सुधासम्बद्धपदार्थान्तरसाधारणे गृहविशेषपरे । सागरपदे सगरसम्बन्धिपदार्थान्तरसाधारणे समुद्रपरे । भूरुहे भूजातपदार्थान्तरसाधारणे वृक्षपरे । शशिनि शशाधाराऽन्यसाधारणे चन्द्रग्रहणे ।

क्षीरनीरधिराकाशपङ्कजं तेन सिद्ध्यति ।
विभक्त्यन्तं पदं वाक्यं तद्व्यूहोऽर्थसमाप्तितः ॥ १३ ॥
युक्तार्थतां[1] तां च विना खण्डवाक्यं स इष्यते ।
वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ॥ १४ ॥

---

सामान्यपरिवृत्त्या यत् सिद्ध्यति तदाह—**क्षीरेति** ॥ १३ ॥ अत्र नीराणि दधातीति विशेषाश्रयणे क्षीरेति व्याहतं स्यात् । सामान्यसमुद्रग्रहणे तु नाऽनुपपत्ति रित्यर्थः ।

ननु पङ्कजपदस्य विशेषपरतायां कमलनिष्ठस्य चन्द्रादिसाधारणसामान्यपरत्वेऽपि कथमाकाशपङ्कजमिति सिद्धिः । तत्राऽप्याकाशप्रभवत्वाभावादिति चेन्न । आकाशसम्बन्धमात्रेणाकाशपङ्कजमितिप्रयोगात् ।

यद्वा मन्दाकिन्यादिवर्णनीयकमलाभिप्रायेण तथा प्रयोगः । एवं सौधस्य गृहमात्रपरत्वे कलधौतसौधः । सागरस्य समुद्रमात्रपरत्वे क्षीरसागरः । भूरुहस्य वृक्षमात्रपरत्वे सुरभूरुहः । शशलाञ्छनशब्दस्य चन्द्रमात्रपरत्वे निष्कलङ्कशशलाञ्छन इति सिद्ध्यति । शशलाञ्छनत्वविशिष्टपरत्वे तु व्याघात एव स्यादित्याशयः । शब्दरूपां वाचं लक्षयित्वा पदादिरूपां लक्षयति—**विभक्त्यन्तं पदमिति** । पदं विभक्त्यन्तम् । अर्थसमाप्तौ पदव्यूहो वाक्यं स पदव्यूह एव खण्डवाक्यम् ।

खण्ड वाक्यं लक्षयति—**युक्तार्थतामिति** ॥ १४ ॥ तामर्थसमाप्तिं विना समासस्थलीयां युक्तार्थताञ्च विना । तथा च अलुक्समासोऽपि न खण्डवाक्यमित्येषामाशयः ॥ समासान्तरे पदसमूहत्वाभावात् ॥ वाक्यत्वं पदवाक्यत्वं च पदैक्येऽपि क्वचिदस्तीत्याह—**वाक्यमिति** ॥

---

१ युक्तार्थानामिति टीकान्तरसम्मतः पाठः ।

धूमवत्त्वादिति यथा देवेत्यामन्त्रणं यथा ।
वाक्यान्येकार्थविश्रान्तान्याहुर्वाक्यकदम्बकम् ॥ १५ ॥
महादेवः सत्रप्रमुखमखविद्यैकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
अनेनाऽसावाद्यः सुकविजयदेवेन रचिते
चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥ १६ ॥

इति चन्द्रालोकालंकारे वाग्विचारोनाम प्रथमो मयूखः ।

---

क्रमादुदाहरति—**धूमवत्त्वादिति** ॥ १५ ॥ अत्रैकस्य विभक्त्यन्तस्य सत्त्वान्न पदसमूहः ॥ हेत्वाकाङ्क्षानिवर्त्तकविशिष्टार्थप्रतिपादकतया वाक्यत्वमित्यर्थः ॥ **देवेति** ॥ अर्थसमाप्तेरभावादित्यर्थः ॥ **वाक्यानीति** ॥ एकार्थोऽवच्छिन्नो वाक्यसमूहो महावाक्यमित्यर्थः ॥

इति श्रीमहाराजाधिराज श्री**रामचन्द्र**देवात्मज युवराज श्री**वीरभद्र**-देवादिष्ट**मिश्र**श्री**बलभद्रा**त्मजसकलशास्त्रारविन्द**प्रद्योतन**-**भट्टाचार्य**विरचिते **चन्द्रालोकप्रकाशे शरदागमे**
प्रथमो मयूखः ॥ १ ॥

## द्वितीयो मयूखः ।

अथ दोषाः

स्याच्चेतोविशता येन सक्षता रमणीयता ।
शब्देऽर्थे च कृतोन्मेषं दोषमुद्घोषयन्ति तम् ॥ १ ॥
भवेच्छ्रुतिकटुर्वर्णः श्रवणोद्वेजने पटुः ।
संविन्दते व्याकरणविरुद्धं च्युतसंस्कृति ॥ २ ॥
अप्रयुक्तं दैवतादिशब्दे पुंल्लिङ्गतादिकम् ।
असमर्थं तु हन्त्यादेः प्रयोगो गमनादिषु ॥ ३ ॥
स हन्ति हन्त कान्तारे कान्तः कुटिलकुन्तलः ।

---

श्रीवीरभद्रदेवे दिशतु जयं सङ्गरप्रकरे ।
मीनावतारशाली कालीयोत्सादनाचतुरः ॥ १ ॥

त्याज्यतया दोषान् प्रथममाह—**स्यादिति** ॥ १ ॥ चेतसि विशता येन रमणीयता नश्यति स दोषः, स च शब्दार्थगतत्वे द्विविध इत्यर्थः ।

श्रोत्रखेदक्षमः श्रुतिकटुरित्याह—**भवेदिति** ॥ २ ॥ यथा ऽत्रैव श्रुतिः इति पदमिति भावः । **संविन्दते इति** । व्याकरणविरुद्धं च्युतसंस्कृति संविन्दते इत्यर्थः । सविन्दतइति अत्र सम्पूर्वत्वेऽप्यात्मनेपदमसाध्वित्यर्थः । अकर्मकस्यैव तद्विधानादिति भावः ।

आम्नातमपि कविभिरनादृतमप्रयुक्तं, यथा दैवतशब्दः पुल्लिङ्ग इत्याह—**अप्रयुक्तमिति** ॥३॥ दैवतानि पुंसि वेति सत्त्वात् । अभिप्रेतमर्थं वक्तुमसमर्थमसमर्थम्, यथा गच्छतीत्यत्र हन्तीत्यसमर्थमित्याह, तदेव च्छन्दोबद्धतयोदाहरति—**स इति** ॥ ४ ॥ स कान्तः कान्तारे हन्ति गच्छतीत्यर्थः । हनहिंसागत्योरिति धातुपाठे सत्यपि न समर्थमित्यर्थः । प्रसिद्धार्थहतौ निहतार्थम्, यथा लोहि-

निहतार्थं लोहितादौ शोणितादिप्रयोगतः ॥ ४ ॥
व्यनक्त्यनुचितार्थं यत् पदमाहुस्तदेव तत् ।
इयमद्भुतशाख्यग्रकेलिकौतुकवानरी ॥ ५ ॥
निरर्थकं तुहीत्यादि पूरणैकप्रयोजनम् ।
अर्थे विदधदित्यादौ दधदाद्यमवाचकम् ॥ ६ ॥
धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः ।
एकाक्षरं विना भूभ्रूक्ष्मादिकं खतलादिवत् ॥ ७ ॥
अश्लीलं त्रिविधं व्रीडाजुगुप्साऽमङ्गलात्मना ।

---

तमिति वक्तव्ये शोणितमिति । दर्शयति—**निहतार्थमिति** । अत्र रुधिरेण रागस्य निहतिरित्यर्थः । च्युतसंस्कृत्यसमर्थयोर्वाचिकत्वे ऽपि क्रमेण व्याकरणकविसम्प्रदायविरोधः अर्थाश्रयस्तु विद्याविरोधश्च्युत-संस्कृते तु शब्दाश्रय इत्याशयः । निहतार्थे तु वाचकत्वमेव नास्ती-ति निहतार्थासमर्थयोर्भेदः ।

एकाक्षरे वर्णान्तरयोगः क्वचिदेव सुन्दर इत्याह—**एकाक्षरमि-ति** ॥ ४ ॥ भूतलं भ्रूलता क्ष्मातलमितिवत् । खतलं द्रुलतेत्यादि न शोभनमित्यर्थः ।

अनुचितार्थमाह—**व्यनक्तीति** ॥ ५ ॥ तदेतदेव अनुचिता-र्थमेव । उदाहरणम्—**इयमिति** । अत्र वानरीरूपकवशात् कामि-न्याः कौरूप्यमनुचितं प्राप्यते ।

केवलपादपूरणप्रयोजनं 'तु' इत्यादि निरर्थकमित्याह—**निरर्थ-कमिति** ॥ ६ ॥

यदुपसर्गसंसर्गेण यो धातुर्यत्रार्थे ऽवाचकस्तस्मिन् तं विनैव प्रयु-क्तो ऽवाचक इत्याह—**अर्थइति** । उदाहरणम्—**धत्तइति** ॥७॥ इदं करोतीत्यर्थे ऽवाचकम् । एवं धत्तइत्यर्थे च विधत्ते इत्यपि ।

व्रीडादिरूपतया त्रिविधमश्लीलमित्याह—**अश्लीलमिति**॥८॥

आह्लादसाधनं वायुः कान्तानाशे भवेत् कथम् ॥ ८ ॥
स्याद् व्यर्थमिह सन्दिग्धं नद्यां यान्ति पतत्रिणः ।
स्यादप्रतीतं शास्त्रैकगम्यं वीताऽनुमादिवत् ॥ ९ ॥
शिथिलं शयने लिल्ये मच्चित्तं ते शशिश्रियि ।
मस्तपिष्टकटीलोष्टगल्लादि ग्राम्यमुच्यते ॥ १० ॥
नेयार्थं लक्षणात्यन्तप्रसरादमनोहरम् ।
हिमांशोर्हारधिक्कारजागरे यामिकाः कराः ॥ ११ ॥
क्लिष्टमर्थो यदीयोऽर्थश्रेणिनिःश्रेणिमृच्छति ।
हरिप्रियापितृवधूप्रवाहप्रतिमं वचः ॥ १२ ॥

---

**आह्लादेति** । साधनवायुनाशशब्दाः पुरुषावयवविशेषशरीरवायुविशेषप्रियामरणप्रतिपादकाः ।

अर्थद्वयप्रतिपादकं सन्दिग्धम् । यथा नद्यां यान्ति नदीरूपे देशे वा यान्तीत्यर्थद्वयप्रतिपादके नद्यामिति शब्दे इत्याह—**स्यादिति** ॥ ९ ॥ यत्पदं शास्त्रमात्रप्रसिद्धं तदवाचकम् । यथा वीतादिपदमनुमानविशेषप्रतिपादकमित्याह—**स्यादिति** ।

उदाहरणेनैव शिथिलं प्रथयति—**शिथिलमिति** ॥ १० ॥ एवंविधानां शिथिलत्वे श्रवणमेव प्रमाणमित्यर्थः । मच्चित्तं ते शयने लिल्ये किम्भूते शशिश्रियि इत्यर्थः ।

मस्तादयः शब्दा ग्राम्या इत्याह—**मस्तेति** । भूयोभिः शब्दैर्लक्षणाश्रयणेन यत्रार्थः प्रतीयते तन्नेयार्थमित्याह—**नेयार्थमिति**॥ ११॥ अत्यन्तप्रसरादमनोहरा लक्षणा नेयार्थः । अत्यन्तप्रसरश्च लक्षणाया बहुपदाश्रयणम् । धिक्कारे जागरयामिका इत्यनेन मनोहरत्वमात्रलाभात् ।

यत्र तु यस्याऽर्थपरम्परया स्वरूपोऽर्थः प्रतीयते तत् क्लिष्टम् । यथा नदीति वक्तव्ये हरीत्याह—**क्लिष्टमिति** ॥ १२ ॥

अविमृष्टविधेयांशः समासपिहिते विधौ ।
विशन्ति विशिखप्रायाः कटाक्षाः कामिनां हृदि ॥१३॥
अपराधीन इत्यादि विरुद्धमतिकृन्मतम् ।
अन्यसङ्गतमुत्तुङ्गहारशोभिपयोधरौ ॥ १४ ॥
रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदुः ।
न मामङ्गद जानासि रावणं रणदारुणम् ॥ १५ ॥
यस्मिन्नुपहतो लुप्तो विसर्ग इह तत्तथा ।
कुसन्धिः पटवागच्छ विसन्धिर्नृपती इमौ ॥ १६ ॥

---

यत्र समासेन विधेयता ऽऽच्छाद्यते सो ऽविमृष्टविधेयांश इत्याह—**अविमृष्टेति** ॥ १३ ॥ **विशन्तीति** । अत्र विशिखवद्विशन्तीति विधेयं तच्च प्रकृतसमासेन प्राप्यते । विशिखकटाक्षयोः साम्यमात्रं तु प्राप्यत इत्यर्थः ।

यत्र विरुद्धा मतिस्तद्विरुद्धमतिकृदित्याह—**अपराधीनेति**॥१४॥ अत्र न पराधीन इति विवक्षितं न अपराधीति च प्रतीयते ।

अन्याऽन्वयविवक्षायामन्याऽन्वितमन्यसङ्गतमित्याह—**अन्येति** । उत्तुङ्गत्वं पयोधरे विवक्षितं हारे च प्रतीयतइत्यर्थः । प्रकृतानुचितवर्णं प्रतिकूलाक्षरम् । यथा वीरे कोमला वर्णा इत्याह—**रसेति** ॥१५॥

विसर्गो यत्रौत्वं प्राप्तः स उपहतविसर्गः । यत्र च लुप्तः स लुप्तविसर्ग इत्याह—**यस्मिन्निति** ॥१६॥ उदाहरणमप्यत्रैव । उपहतो लुप्तो इति प्रथमोदाहरणम् । विसर्ग इहेति चरमोदाहरणम् ।

**कुसन्धीति** । पटो आगच्छेत्यत्र पटवागच्छेति सन्धेर्न मनोहरत्वमित्यर्थः ।

**विसन्धीति** । स्वेच्छया विसन्धिः सकृदपि दोषः सौत्रस्त्वसकृदिति भावः ।

हतवृत्तमनुक्तोऽपि छन्दोदोषश्चकास्ति चेत् ।
विशाललोचने ! पश्याम्बरं तारातरङ्गितम् ॥ १७ ॥
न्यूनं त्वत्खड्गसंभूतयशःपुष्पं नभस्तटम् ।
अधिकं भवतः शत्रून् दशत्यसिलताफणी ॥ १८ ॥
कथितं पुनरुक्ता वाक् श्यामाब्जश्यामलोचना ।
विकृतं दूरविकृतैरैयरुः कुञ्जराः पुरम् ॥ १९ ॥
पतत्प्रकर्षं हीनाऽनुप्रासादित्वे यथोत्तरम् ।
गम्भीरारम्भदम्भोलिपाणिरेषः समागतः ॥ २० ॥
समाप्तपुनरात्तं स्यादेष पीयूषभाजनम् ।
नेत्रानन्दी तुषारांशुरुदेत्यम्बुधिबान्धवः ॥ २१ ॥

---

यत्र च्छन्दोऽश्रव्यता भवति तद्धतवृत्तमित्याह—**हतवृत्तमिति** ॥ १७ ॥ अत्रोदाहरणे छन्दोलक्षणलक्षितत्वेऽपि पश्याम्बरमित्यत्र पूर्वस्वरेणोत्तरस्वरस्य ग्रस्तत्वात्काचिदश्रव्यता भवतीति भावः ।

**न्यूनमिति** ॥ १८ ॥ अत्र यशसः पुष्पत्वमिव खड्गस्य लतात्वमपेक्षितं न कृतमिति न्यूनमित्यर्थः ।

**अधिकमिति** । अत्राऽसिफणीत्येतावतैव चरितार्थत्वे लतेत्यधिकमित्यर्थः ।

**कथितमिति** ॥ १९ ॥ श्यामपदस्य द्विरुपादानादित्यर्थः । यत् दूरविकृतेः महतो धात्वादिविकारान्निष्पद्यते **तद्विकृतम्** । यथा **ऐयरुरिति** । एष झटित्यर्थोऽप्रत्यायकतया दोष इति भावः ॥ प्रारम्भे स्वीकृतस्यानुप्रासादेस्त्यागे पतत्प्रकर्षमित्याह—**पतत्प्रकर्षमिति** ॥ २० ॥ **गम्भीरेति** । अत्र पाणिरित्यादिना ऽनुप्रासत्यागात् ।

**समाप्तेति** ॥ २१ ॥ उदेतीत्यन्तेन वाक्यार्थे समाप्ते पुनश्चन्द्रमसो विशेषणोपादानं समाप्तपुनरात्तमित्यर्थः ।

अर्धान्तरपदापेक्षि क्रीडानृत्येषु सस्मितम् ।
मोघारम्भं स्तुमः शम्भुमर्धरम्भोरुविग्रहम् ॥ २२ ॥
अभवन्मतयोगः स्यान्न चेदभिमतोऽन्वयः ।
येन बद्धोऽम्बुधिर्यस्य रामस्यानुचरा वयम् ॥ २३ ॥
द्विषां संपदमाच्छिद्य यः शत्रून् समपूरयत् ।
अस्थानस्थसमासं न विद्वज्जमनोरमम् ॥ २४ ॥
मिथः पृथग्वाक्यपदैः संकीर्णं यत्तदेव तत् ।
वक्त्रेण भ्राजते रात्रिः कान्ता चन्द्रेण राजते ॥२५॥

---

यत्रैकस्मिन्नर्द्धेऽर्द्धाऽन्तरपदापेक्षा भवति तद् दुष्टमित्याह—**अर्द्धान्तरपदेति** ॥ २२ ॥ अत्र हि पूर्वार्द्धे उत्तरार्द्धपदापेक्षा अर्धान्तरमर्द्धनारीश्वरस्य गौरीभागस्तत्पदापेक्षि यत् क्रीडानृत्यं तत्र मोघारम्भं अत एव सस्मितमित्यन्वयेनोत्तरार्द्धवर्तिनो मोघारम्भपदस्य पूर्वार्द्धेनाऽपेक्षणात् । स्वभागस्य नृत्ये प्रवृत्तावपि यदा मानादिना गौरीभागो नृत्ये न प्रवृत्तस्तदा मोघारम्भतेत्यर्थः । एतावताऽनेन सम्पूर्णेन पद्येनोदाहरणं लक्षणं त्वेकदेशेनेति भावः ।

यत्रेष्टोऽन्वयो न निर्वहति तत्राऽभवन्मतयोग इत्याह—**अभवदिति** ॥२३॥ उदाहरणम्—**येनेति** । अत्रोत्तरार्द्धम्—स एष लङ्कालङ्कारं रावणं हन्तुमुद्यतः । अत्र रामस्येति पदं यस्येति विशेषणेनान्वितं न येनेत्यनेनाऽन्वेति । विशेषणानां परस्परमन्वयात् । स इति विशेष्यनिकटे तु प्रथमान्तं सर्वान्वितं स्यात् । विशेष्ये सर्वविशेषणानामन्वयादित्यर्थः ।

**द्विषामिति** ॥ २४ ॥ अत्र द्विषामित्यादौ शौर्यवर्णने वचितोऽपि समासो न कृतः । विद्वज्जनमनोहरमित्यत्र तु कृत इत्यर्थः । तस्मादत्राऽस्थानस्थस्य समासो दूषणमिति भावः ।

अन्यवाक्ये ऽन्यवाक्यपदप्रवेशे सङ्कीर्णमित्याह—**मिथ इति**॥२५॥

ब्रह्माण्डं त्वद्यशःपूरगर्भितं भूमिभूषण ।
आकर्णय पयःपूर्णसुवर्णकलशायते ॥ २६ ॥
भग्नप्रक्रममारब्धशब्दनिर्वाहहीनता ।
अक्रमः कृष्ण पूज्यन्ते त्वामनभ्यर्च्य[1] देवताः ॥ २७ ॥
अमतार्थान्तरं मुख्येऽमुख्येनार्थे विरोधकृत् ।
त्यक्तहारमुरः कृत्वा शोकेनालिङ्गिताऽङ्गना ॥ २८ ॥
अपुष्टार्थो विशेष्ये चेन्न विशेषो विशेषणात् ।
विशन्ति हृदयं कान्ताकटाक्षाः खञ्जनत्विषः ॥ २९ ॥

---

अत्र कान्ताऽन्वितस्य वक्तव्यस्य रात्रिवाक्ये पठनात्सङ्कीर्णमित्यर्थः ।

एवमन्यत्रापि वाक्ये वाक्यान्तरप्रवेशे गर्भितमित्याह—**ब्रह्माण्डमिति** ॥ २६ ॥ अत्र भूमिभूषण आकर्णयेति भिन्नं वाक्यं ब्रह्माण्डे वाक्यमध्ये प्रविष्टम् ।

आरब्धधात्वाद्यनिर्वाहे भग्नप्रक्रममित्याह—**भग्नेति** ॥ २७ ॥ अत्र पूज्यन्तेऽनभ्यर्च्येति धातुभेदः । अक्रमो ऽप्यत्रैव लक्षितः । त्वामभ्यर्च्य देवताः पूज्यन्त इति क्रमानिर्वाहात् । तथा चाऽकरणात् ।

अमताऽर्थाऽन्तरमाह—**अमतेति** ॥ २८ ॥ यत्र प्रतीयमानमर्थान्तरं मुख्येनाऽमुख्येन वाऽर्थेन विरुद्धं तदमतार्थान्तरमित्यर्थः । उदाहरति—**त्यक्तेति** ॥ २९ ॥ अत्र कान्तवृत्तान्तपरिस्फूर्तिर्भवति । सा चाऽनुचिता शोकाधिक्यदशायां तस्या अप्रस्तुतत्वादिति भावः ।

अर्थदोषेष्वपुष्टमाह—**अपुष्टमिति** ॥२९॥ यत्र विशेषणेन कश्चिदतिशयो ना ऽऽधीयते विशेष्ये तत्राऽपुष्टार्थता । यथा—**विशन्तीत्यादौ** । न हि **खञ्जनात्विष** इत्यनेन कटाक्षाणां हृदयप्रवेशातिऽशयाऽनुकूलः कश्चिदतिशय आधीयते । शरसन्निभा इति तु सम्यगिति भावः ।

---

[1] 'त्वामनाराध्येति' टीकान्तरसंमतः पाठः ।

कष्टः स्पष्टावबोधार्थमक्षमो वाच्यसन्निभः ।
व्याहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः ॥ ३० ॥
सहस्रपत्रमित्रं ते वक्त्रं केनोपमीयते ।
कुतस्तत्रोपमा यत्र पुनरुक्तः सुधाकरः ॥ ३१ ॥
दुष्क्रमग्राम्यसन्दिग्धास्त्रयो दोषाः क्रमादमी ।
त्वद्भक्तः कृष्ण ! गच्छेयं नरकं स्वर्गमेव वा ॥ ३२ ॥
एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम् ।
ब्रूत किं सेव्यतां चन्द्रमुखीचन्द्रकिरीटयोः ॥ ३३ ॥
अनौचित्यं कीर्तिलतां तरङ्गयति यः सदा ।
प्रसिद्ध्या विद्यया वापि विरुद्धं द्विविधं मतम् ॥ ३४ ॥
न्यस्तेयं पश्य कन्दर्पप्रतापधवलद्युतिः ।

---

कष्टमाह-**कष्टइति** ॥ ३० ॥ वाचि असन्निभोऽसत्कल्पोऽर्थः स्पष्टाऽवबोधार्थमक्षमः स कष्ट इत्यर्थः । यत्र विद्यमानो ऽप्यर्थः स्पष्टप्रत्ययाभावेनाऽसन्निव तत्र कष्टता । यथा तत्रैव वाचि असन्निभ इति महता प्रयासेन प्रत्ययादिति भावः ।

**व्याहत इति** । अर्थयोर्विरोधे व्याहतः, यथा—**सहस्रे-त्यादौ** ॥ ३१ ॥ अत्र कमलमित्रत्वेनोपमा प्राप्तैवेति केनोपमीयत इति अनेन निषेध उपपन्न इति भावः । सकलश्लोकेन पुनरुक्तोऽप्युदाहृतः । केनोपमीयत इत्यनेनोपमानिषेधानन्तरं कुतस्तत्रोपमेत्यनेन निषेधात् ।

**त्वद्भक्त** इत्यत्र दुष्क्रमः । भक्तिफलस्य स्वर्गस्य प्राक् निर्देशार्हत्वात् । **एक**मित्यादौ ग्राम्यं स्फुटमेव । **ब्रूत** इत्यादौ प्रकरणाद्यभावे शान्तशृङ्गारान्यतरपरत्वसन्देह इत्याह-**दुष्क्रमेति** ॥३२॥३३॥

**अनौचित्यमिति** ॥ ३४ ॥ लतायां पल्लवयतीत्युचितम् ।

**न्यस्तेति** ॥ ३५ ॥ प्रतापस्य धवलत्वं प्रसिद्धिविरुद्धम् ।

केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम् ॥ ३५ ॥
सामान्यपरिवृत्तिः स्यात् कुण्डलच्छविविग्रहा ।
विशेषपरिवृत्तिः स्याद्वनिता मम चेतसि ॥ ३६ ॥
तथा सहचराऽचारुविरुद्धान्योन्यसंगती ।
ध्वाङ्क्षाः सन्तश्च तनयं स्वं परश्च न जानते ॥ ३७ ॥
सरोजनेत्र पुत्रस्य मुखेन्दुमवलोकय ।
पालयिष्यति ते गोत्रमसौ नरपुरन्दरः ॥ ३८ ॥
पदे तदंशे वाक्यांशे वाक्ये वाक्यकदम्बके ।
यथानुसारमभ्यूहेद्दोषान् शब्दार्थसंभवान् ॥ ३९ ॥
दोषमापतितं स्वान्ते प्रसरन्तं विशृङ्खलम् ।
निवारयति यस्त्रेधा दोषाङ्कुशमुशन्ति तम् ॥ ४० ॥

---

आरक्तत्वेन वर्णनात् । केतकीपूजा च शम्भोः पुराणविरुद्धेत्यर्थः ।

**सामान्येति** ॥ ३६ ॥ कनकेतिसामान्ये वक्तव्ये कुण्डलेति विशेषविधानात सामान्यपरिवृत्तिरित्यर्थः । **विशेषेति** । प्रियेति विशेषे वक्तव्ये वनितेति सामान्योक्तिर्विशेषपरिवृत्तिरित्यर्थः ।

एकः सहचराऽचारुरपरः स्वविरुद्धाऽन्योन्यसङ्गतिर्दोष इत्याह—**तथेति** ॥ ३७ ॥ **ध्वाङ्क्ष इति** । ध्वाङ्क्षाश्च सन्तश्च स्वपरपुत्रदृष्टि-भेदशून्या इत्यर्थः । अत्र काकसाहचर्यं सतो न रम्यमिति भावः । **सरोजेति** ॥ २८ ॥ नेत्ररूपकस्य मुखरूपकस्येन्दोश्च सङ्गतिर्विरु-द्धा । गोत्रस्य द्वितीयार्थमर्यादया पुरन्दररूपकं च विरुद्धम् । पुरन्दरस्य गोत्रभिदो गोत्रपालकत्वाऽसम्भवात् इत्यर्थः ।

दोषाश्रयानाह—**पदइति** ॥ ३९ ॥

दोषाङ्कुशलक्षणमाह—**दोषमिति** ॥४०॥ यो निपातितमपि दोषं शृङ्खलाशून्यतया प्रसरन्तं निवारयति स दोषाङ्कुशस्तन्निवारणं त्रेधा इत्यर्थः ।

---

१ 'द्धौ स्तः' इति टीकान्तरसंमतः पाठः ।

दोषे गुणत्वं तनुते दोषत्वं वा निरस्यति ।
भवन्तमथ वा दोषं नयत्यत्याज्यतामसौ ॥ ४१ ॥
मुखं चन्द्रश्रियं धत्ते श्वेतश्मश्रुकराङ्कुरैः ।
अत्र हास्यरसोद्देशे ग्राम्यत्वं गुणतां गतम् ॥ ४२ ॥
तव दुग्धाब्धिसंभूतेः कथं जाता कलङ्किता ।
कवीनां समयाद्विद्याविरुद्धोऽदोषतां गतः ॥ ४३ ॥
दधार गौरी हृदये देवं हिमकराङ्कितम् ।
अत्र श्लेषोदयान्नैव त्याज्यं हीति निरर्थकम् ॥ ४४ ॥

महादेव इति प्राग्वत् । द्वितीयस्तेनासाविति विशेषः ॥

इति चन्द्रालोके दोषनिरूपणो नाम द्वितीयो मयूखः ।

---

त्रैविध्यं दर्शयति—**दोष इति** ॥ ४१ ॥ क्वचिद्दोषोऽपि गुणो भवति क्वचिद्दोषत्वं मुञ्चति गुणत्वं तु न याति क्वचित्पतन्तमपि दोषं स्वीकारयति दोषाङ्कुश इत्यर्थः ।

आद्यमुदाहरति—**मुखमिति** ॥ ४२ ॥ अत्र श्वेतेत्यादि ग्राम्यापि वर्णना गुण एव हास्यरसपोषकत्वादित्यर्थः ।

क्षीरोदधिप्रसूतश्चन्द्रो निष्कलङ्कोऽत्रिनेत्रसमुद्भूत इति पुराणप्रसिद्धिः । साऽपि प्रथमस्यापि कलङ्कित्ववर्णनेन न दोषः कविप्रसिध्या द्वयोश्चन्द्रमसोरैक्याध्यवसायादित्याह—**तवेति** ॥ ४३ ॥ अत्र पृष्टश्चन्द्र एव तथोत्तरयतीति भावः ।

तृतीयमुदाहरति—**दधारेति**॥४३॥ अत्र कामपक्षे हिकारस्य वैयर्थ्येऽपि शम्भुना श्लेषनिर्वाहायोपादानं कान्ताहृदये प्रियमन्मथयोरपि स्थितेः।

श्रीवीरभद्रदेवादेशादुदितप्रयत्नेन ।
प्रथमाऽग्रिमो मयूखश्चन्द्रालोके कृतः सार्थः ॥

इति श्रीमहाराजाधिराजश्रीरामचन्द्रदेवात्मजयुवराजश्रीवीरभद्रदेवादिष्टमिश्रश्रीबलभद्रात्मजसकलशास्त्रारविन्दप्रद्योतनभट्टाचार्यैविरचिते चन्द्रालोकप्रकाशे शरदागमे द्वितीयो मयूखः ॥२॥

## तृतीयो मयूखः ।

### अथ लक्षणानि ।

अल्पाक्षरा विचित्रार्थख्यातिरक्षरसंहतिः ।
उषाकान्तेनानुगतः शूरः शौरिरयं पुनः ॥ १ ॥
शोभा ख्यातोऽपि यद्दोषो गुणकीर्त्या निषिध्यते ।
मुधा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते ॥ २ ॥
अभिमानो विचारश्चेदूहितार्थनिषेधकृत् ।
इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि ॥ ३ ॥
हेतुस्त्यक्त्वा बहून् पक्षान् युक्त्यैकस्यावधारणम् ।
नेन्दुर्नार्कोऽयमौर्वाग्निः सागरादुत्थितो दहन् ॥ ४ ॥

---

यस्याज्ञया विधत्ते **भट्टाचार्यः** शुभां टीकाम् ।
हरिरिह कूर्मावतरः शर्माऽऽदिशतु प्रभोस्तस्य ॥ १ ॥

अथ लक्षणानि । तत्राऽऽदावक्षरसंहतिः—**अल्पाक्षरेति** ॥१॥ **उषेति** ॥ अत्राऽमुना विशेषणेन स्वल्पाक्षरैरेवोषापरिणये बाणपुरे वृत्तं भगवतः पौरुषं स्मारितम् । एवं च स्वल्पाक्षरैर्यत्र बह्वर्थप्रतीतिः सा ऽक्षरसंहतिरित्यर्थः ।

यत्र गुणवर्णनेन प्रसिद्धदोषप्रतिषेधः सा शोभा । यथा भगवत्पूजालक्षणवर्णनेन संसारदोषाऽपाकरणमित्याह—**शोभेति** ॥ २ ॥

ऊहितार्थप्रतिषेधको विचारो ऽभिमानः । यथेन्दुरित्यादौ । विरहिण्या प्रथममिन्दुत्वेन चन्द्रस्तर्कितस्तीव्रत्वेन निषिद्धः । पश्चात्सूर्यत्वेन तर्कितो रात्रिसम्बन्धेनेत्याह—**अभिमानइति** ॥ ३ ॥

हेतुस्तु परिशेषपर्यवसन्नः । यथा नेन्दुरित्यादौ । तत्र दहन् सागरादुत्थित इत्यनेन चन्द्रादिनिरासे वडवाऽग्नौ पर्यवसानादित्याह—**हेतुरिति** ॥ ४ ॥ अत्र दहन् इत्यनेन चन्द्रः सागरादुत्थित इत्यनेन सूर्यः प्रतिषिद्ध इति भावः ।

प्रतिषेधः प्रसिद्धानां कारणानामनादरः ।
न युद्धेन भ्रुवोः स्पन्देनैव वीरा निपातिताः ॥ ५ ॥
निरुक्तं स्यान्निर्वचनं नाम्नः सत्यं तथानृतम् ।
ईदृशैश्चरितै राजन् सत्यं दोषाकरो भवान् ॥ ६ ॥
स्यान्मिथ्याध्यवसायश्चेदसती साध्यसाधने ।
चन्द्रांशुसूत्रग्रथितां नभःपुष्पस्रजं वह ॥ ७ ॥
सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये ।
युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ॥ ८ ॥
युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात् ।

---

प्रसिद्धकारणाऽनादरः प्रतिषेधः । यथा **नेत्यादौ** । तत्र प्रसिद्धयुद्धाऽनादरेणाऽप्रसिद्धभ्रूस्पन्दाश्रयणादित्याह- **प्रतिषेध इति** ॥५॥

निरुक्तमाह- **निरुक्तमिति** ॥ ६ ॥ नाम्ना निर्वचनं निरुक्तं तत् द्वेधा सत्यं मिथ्या वेत्यर्थः । प्रथमोदाहरणम्- **ईदृशैरिति** ॥ अत्र दोषा रात्रिस्तत्कारित्वे ऽर्थे निर्वचनस्य व्याकरणेन झटिति सिद्धे सत्यत्वमित्यर्थः ॥ राजा प्रकृतिरञ्जनादिति तु मिथ्या निर्वचनं, अमुना निर्वचनेनाऽस्य प्रयोगस्यौणादिषु दुःसाध्यत्वादेवं च सुकरं निर्वचनं सत्यमन्यत्तु मिथ्येति भावः ॥

यत्र साध्यसाधनयोर्द्वयोरप्यसत्त्वं स मिथ्याध्यवसाय इत्याह— **स्यादिति** ॥ ७ ॥ **चन्द्रेति** । अत्र साधनस्यांऽशोः सूत्ररूपेणाऽसत्त्वं नभ इत्यादेस्तु स्वरूपेणैवेत्यर्थः ॥

प्रसिद्धसाहचर्येण कीर्तनं तत्तुल्यतायै सिद्धिः । यथा जलधिसाहचर्येण कस्यचिद्युवामित्यादावित्याह— **सिद्धिरिति** ॥ ८ ॥ त्वमित्यस्यानामत्वे ऽपि तत्प्रतिपादकत्वमस्त्येवेति भावः ।

यत्राऽपूर्वार्थसम्बन्धेनाऽभिलषितस्य विशेषस्य सिद्धिः सा युक्तिः । यथा **नव** इत्यादौ । अत्र जलदान्तराऽदृष्टसुवर्णवृष्ट्या वर्णनीये न च

IMPERIAL LIBRARY

नवस्त्वं नीरदः कोऽपि स्वर्णैर्वर्षसि यन्मुहुः ॥ ९ ॥
कार्यं फलोपलम्भश्चेद्व्यापाराद्वस्तुतोऽथ वा ।
असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ॥ १० ॥
इत्यादि लक्षणं भूरि काव्यस्याहुर्महर्षयः ।
स्वर्णभ्राजिष्णुभालत्वप्रभृतीव महीभुजः ॥ ११ ॥
महादेव इति पूर्ववत् । तृतीयस्तेनासाविति विशेषः ।

इति चन्द्रालोकालङ्कारे लक्षणनिरूपणो नाम तृतीयो मयूखः ।

---

नीरदत्वसिद्धिरित्याह—**युक्तिरिति** ॥ ९ ॥

व्यापाराद्वस्तुतो वा यत्र फलोपलम्भस्तत्कार्यं तस्य पूर्वस्योदाहरणमसाविति । अत्रोदयलक्षणव्यापारेण चन्द्रमसः कामिनीनां मानच्छेदवर्णनादित्याह—**कार्यमिति** ॥ १० ॥ मया कियन्ति लक्षणानि दर्शितान्यन्यान्यपि सन्तीत्यादि प्रयोगेनाह—**इत्यादीति** ॥ ११ ॥ यथा स्वर्णभ्राजिष्णुभालत्वादयः क्षितिपतेर्लक्षणत्वेन कीर्तिता इत्यर्थः ।

श्री**वीरभद्र**भूपतिलब्धनिदेशेन यत्नेन ॥
चन्द्रालोकमयूखो रचितः सार्थस्तृतीयोऽपि ॥ १ ॥

इति **शारदागमे** तृतीयो मयूखः ॥ ३ ॥

## चतुर्थो मयूखः

### अथ गुणाः

श्लेषो विघटमानार्थघटमानत्ववर्णनम् ।
स तु शाब्दः सजातीयैः शब्दैर्बन्धः सुखावहः ॥ १ ॥
उल्लसत्तनुतां नीतेऽनन्ते पुलककण्टकैः ।
भीतया मानवत्यैव श्रियाऽऽश्लिष्टं हरिं स्तुमः ॥ २ ॥
यस्मादन्तःस्थितः सर्वः स्वयमर्थोऽवभासते ।
सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ॥ ३ ॥
समताऽल्पसमासत्वं वर्णाद्यैस्तुल्यताऽथ वा ।
श्यामला कोमला बाला रमणं शरणं गता ॥ ४ ॥

---

प्रतिभूपतिमतयशसो वीरश्री**वीरभद्रस्य** ।
वन्द्यः सुरासुराणां व्याजवराहः श्रियं दिशतु ॥ १ ॥

अथ गुणाः । **श्लेषइति** ॥ १ ॥ यो ऽर्थो न घटते तस्य केन चिन्निमित्तेन घटमानतावर्णनं श्लेषः । सजातीयैः शब्दैः सुखावहो बन्धस्तु शाब्दः श्लेष इत्यर्थः । उभयोरुदाहरणम्-**उल्लसदिति** ॥२॥ अत्र मानवत्या आलिङ्गनं न सम्भवति सम्भावितं तु समुन्नतरोमसम्बद्धशेषनागवपुःकम्पेन तस्या भयोदये इत्याद्योदाहरणम् । द्वितीयोदाहरणं तु स्फुटमेव वर्णानां साजात्यादिति भावः ।

यद्बलात्सूक्तस्याऽन्तः स्थितः सर्वो ऽर्थो भासते स्पष्टं सलिलस्येव स प्रसाद इत्याह-**यस्मादिति** ॥ ३ ॥ उदाहरणमप्येतदेव ।

यत्र बहुसमासाभावः सा **समता**, ऽन्यथोदाहृतएव न याति समासस्याऽभावात् ॥ ४ ॥ वर्णसङ्ख्यासामान्येन पदतुल्यता वा समता । श्यामलेत्यादौ पदद्वये त्र्यक्षरत्वेन तृतीयपदे द्व्यक्षरत्वेन प्रथमद्वितीययोः पादयोः साम्यात् । श्यामलेत्यादौ प्रथमपादे आकारवर्ण-

समाधिरर्थमहिमा लसद्घनरसात्मना ।
स्यादन्तर्विशता येन गात्रमङ्कुरितं सताम् ॥ ५ ॥
माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम् ।
वयस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम् ॥ ६ ॥
ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाऽतिभूयसः ।
रिपुं हत्वा यशः कृत्वा त्वदसिः कोशमाविशत् ॥ ७ ॥
सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात् ।

---

साम्याच्चेत्यर्थः । न च प्रथमं लक्षणं पाञ्चाल्यां गतम् , तत्र बहुषु पादेषु समासाभावस्येष्टत्वात् । एकपादेऽपि समासाभावे समतानिर्वाहात् । केवलस्वरसाम्येनाऽनुप्रासाभावेन द्वितीयं नाऽनुप्रासे यातीति भावः । समाधिमाह-**समाधिरिति** ॥५॥ सोऽर्थमहिमा समाधिर्येन लसद्घनरसात्मना ऽन्तर्विशता गात्रमङ्कुरितं भवतीत्यर्थः । यथा ममैव-

कैलासाभिमुखेषु केषुचिदुमामालोक्य शङ्काकुलां
दर्पाज्जीर्णविषेण भूतपतिना क्षिप्रा निगीर्णा हठात् ॥
भाले दृष्टिपथेन दुर्जरतया कल्पानलादुल्बणा
भूयः पल्लविता हुताशनमिषाद्यस्य प्रतापांशवः ॥ १ ॥

एतदर्थप्रतीतौ रोमोद्गमे सहृदया एव साक्षिणः । **माधुर्यमिति** ॥ ६ ॥ पुनरुक्तस्य चारुतावहं वैचित्र्यमेतादृशपौनरुक्त्यापेक्षया वैलक्षण्यं माधुर्यमित्यर्थः । उदाहरणम्-**वयस्येति** । अत्र पश्येति पुनरुक्त्या काचिद्रमणीयता भवति दर्शने आदरप्रतीतेः ।

अर्थस्य प्रौढिरोजः सा चाऽविद्यमानेन केनचिदुत्कर्षाधायकरूपेण वर्णनम् ॥ ७ ॥ अतिभूयसोऽर्थस्य संक्षेपो वा ओजः । उदाहरणम्-**रिपुमिति** । अत्र करणस्य कर्तृत्वेन वर्णनात्प्रौढिः संक्षेपस्तु स्फुट एवेति भावः ।

पर्यायपरिवृत्त्या पारुष्याऽभावः सौकुमार्यमित्याह-**सौकुमार्य-**

स कथाशेषतां यातः समालिङ्ग्य मरुत्सखम् ॥ ८ ॥
उदारता तु वैदग्ध्यमग्राम्यत्वात् पृथङ्मता ।
मानं मुञ्च प्रिये किंचिल्लोचनान्तमुदञ्चय ॥ ९ ॥
शृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसंग्रहः ।
अमी दश गुणाः काव्ये पुंसि शौर्यादयो यथा ॥१०॥

---

मिति ॥ ८ ॥ **स इति** । अत्राऽग्नौ प्रविश्य मृत इति प्रयोक्तव्ये पर्यायेणाऽभिधानम् । साक्षात्तेन शब्देनाऽभिधाने झटित्यमङ्गलप्रतीतेः पारुष्यमित्यर्थः । वस्तुतस्तु तादृशः शब्द एव परुषः प्रविश्येत्यादिप्रवेशादिति ध्येयम् ।

वैदग्ध्यमुदारता सा च न ग्राम्यत्वाभावे ऽन्तर्भूतेत्याह—**उदारतेति** ॥ ९ ॥ उदाहरणम्—**मानमिति** । विलोकयेत्युक्तावपि न ग्राम्यत्वं लोचनान्तमित्यनेन तु वैदग्ध्यम् ।

कान्तेः शृङ्गारेण सङ्ग्रहः अर्थव्यक्तेः प्रसादेनेत्याह—**शृङ्गारेति** ॥ १० ॥ क्वचित् शृङ्गारादाविति पाठः । ननु दीप्तिः कान्तिरुक्तोदाहृता च प्रेयान्सोऽयमित्यनेनेर्ष्यानुभावस्यौत्सुक्यानुभावस्य चाऽत्र दीप्तेर्वर्णनाद्भवता च शृङ्गारे ऽन्तर्भाव उच्यत इति चेन्न । तावताऽपि शृङ्गारमहिम्नो ऽनतिक्रमात् । नह्यत्र पद्ये शृङ्गारो न प्रतीयत इति । अर्थव्यक्तिप्रसादयोरभेदः स्फुट एवोभयोरकष्टेनाऽर्थप्रतीतिस्वरूपत्वात् ।

गुणसङ्ख्यामुपसंहरति—**अमी दशेति** । निरन्तरैकवर्णा वृत्तिरनुप्रासः । व्यवधाने तु शब्दश्लेष इति न तयोः सङ्करः । माधुर्यलाटाऽनुप्रासयोश्च न सङ्करः । लाटानुप्रासे ऽभिप्रायभेदस्य बीजत्वात् । अत्राऽतिशयमात्रविवक्षाया मूलत्वात । एवमन्यत्राऽप्यन्तर्भाव एषां गुणानामपसारणीयः ।

तिलकाद्यमिव स्त्रीणां विदग्धहृदयङ्गमम् ।
व्यतिरिक्तमलङ्कारं प्रकृतेर्भूषणं गिराम् ॥ ११ ॥
विचित्रलक्षणो न्यासो निर्वाहः प्रौढिरौचिती ।
शास्त्रान्तररहस्योक्तिः संग्रहो दिक् प्रदर्शिता ॥ १२ ॥
महादेव इति पूर्ववत् । चतुर्थस्तेनासाविति विशेषः ।

इति चन्द्रालोकालङ्कारे गुणनिरूपणो नाम चतुर्थो मयूखः ॥

---

भूषणमाह—**तिलकेति** ॥ ११ ॥ यथा स्त्रीणां तिलकाद्यं भूषणमलङ्कारात्ताटङ्कादेर्भिन्नं, तथाऽत्राऽप्युपमादिभिन्नं भूषणमस्तीत्यर्थः ।

**विचित्रेति** ॥ १२ ॥ विचित्रं लक्षणं सूत्रं यत्रैतादृशस्य प्रयोगस्य न्यासः । यथोदरम्भरयश्चकोरा इत्यादेर्निर्वाहः । 'सोऽहमाजन्मशुद्धाना' मित्यादौ उदाहरणे लक्ष्म्यभिधायिशब्दप्रयोगः प्रौढिः । यथा—'मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समग्र' मित्यत्र लक्ष्म्या मन्दाक्रान्ताया औचिती । वागर्थाविवेत्यादौ फलत्वेन प्रस्तुताभ्यां वागर्थाभ्यां नमस्ययोरुपमानोपमेयभावस्योचितत्वात् ।

शास्त्रान्तररहस्योक्तिः ज्याकृष्टिबद्धखटिकामुखपाणिपृष्ठेत्यादौ सङ्गीतशास्त्रसिद्धस्य हस्तकविशेषस्य खटिकामुखेत्यनेनोपादानात् सङ्ग्रहः । शृङ्गारी गिरिजानन इत्यादौ । अत्र शृङ्गारादीनां सङ्ग्रहः दिगित्यनेन भूषणान्तरमप्यस्तीति सूचितम् ।

श्री**वीरभद्र**भूपतिलब्धनिदेशेन यत्नेन ।
चन्द्रालोकमयूखो रचितः सार्थश्चतुर्थोऽपि ॥ १ ॥

॥ इति **चन्द्रालोकप्रकाशे शारदागमे** चतुर्थो मयूखः ॥ ४ ॥

## पञ्चमो मयूखः ।

**अथालंकाराः**

शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा ।
हारादिवदलङ्कारः सन्निवेशो मनोहरः ॥ १ ॥
स्वरव्यञ्जनसंदोहव्यूहामन्दोहदोहदा ।
गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा ॥ २ ॥

---

दैतेयहृदयदारणदक्षनखप्रान्तभीषणाकारम् ॥
दैवतशर्मसमर्थं नर्मनृसिंहं हृदा कलये ॥ १ ॥

अथाऽलङ्कारसामान्यलक्षणमाह–**शब्देति** ॥ १ ॥ शब्दस्याऽर्थस्य वा मनोहरः सन्निवेशोऽलङ्कारो न तु पुंसः कुण्डलादिवत्पृथग्भूतः । अनुप्रासादेः शब्दएवाऽन्तर्भावात् । उपमादेरर्थान्तर्गतत्वात् । एवं च हारादिवदिति दृष्टान्तो न सर्वांशे ऽपि तु रमणीयताऽऽधानमात्रे । गुणादयोऽपि मनोहरसन्निवेशरूपाः किं नाऽलङ्कारा इति चेन्न । कवेरलङ्कारत्वेन प्रसिद्ध्या ऽलङ्काराणां गुणादिभ्यो भेदात् । न केवलं प्रसिद्ध्यैवाऽलङ्कारा अपि तु कविप्रौढ्या पूर्वाऽऽचार्यापरिगणिता अपि कतिचिदलङ्कारा इत्याह–**कवेःप्रौढिवशेन वेति** । एवं चाऽलङ्कारत्वेन प्रसिद्ध्या कतिचिदलङ्काराः कतिचित्त्वतथाभूता अपि मया प्रौढ्या उपनिबद्धव्या इति भावः ।

विशेषेषु प्रथमं शब्दालङ्कारेषु छेकानुप्रासमाह–**स्वरेति** ॥ २ ॥ अनु एकदा कथनोत्तरं यत्र त एव वर्णाः प्रकर्षेणाऽऽस्यन्ते सोऽनुप्रासः। छेकानुप्रासस्तु छेकानां विदग्धानां अनुप्रासः स च व्यञ्जनस्तोमानां स्वरस्तोमानां व्यूहेनावृत्तो भवति उदाहरणमयमेव श्लोकः । दोहेत्याद्यावृत्तेः सत्त्वात् । जगादित्यादौ स्वरभेदे ऽपि जकारगकारव्यञ्जनसारूप्यात् । छेका इत्यत्र स्वरस्तोमावृत्तेरपि सत्त्वात् । एकाराकारयोरा-

आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः ।
अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम् ॥ ३ ॥
लाटानुप्रासभूर्भिन्नाभिप्राया पुनरुक्तता ।
यत्र स्यान्न पुनः श्रोत्रोर्गर्जितं तज्जितं जितम् ॥ ४ ॥
श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा ।
तदा मता मतिमतां स्फुटानुप्रासता सताम् ॥ ५ ॥
उपमेयोपमानादावर्थानुप्रास इष्यते ।
चन्दनं खलु गोविन्दचरणद्वन्द्ववन्दनम् ॥ ६ ॥

---

वृत्तेः । श्लोकान्वयस्तु या गीर्वाणी स्वरव्यञ्जनयोर्थः सन्दोहः स्तोमस्तद्व्यूहविशिष्टा तदावृत्तिमती सा छेकानुप्रासेन शोभना जगति जाग्रदुत्कर्षा अमन्दो य ऊहस्तद्दोहदेति । यद्वचः केवलवर्णावृत्त्या सम्पूर्णं पूरितं तत्र वृत्त्यनुप्रासः । यत्र केवलस्य वर्णस्य तत्र यथा मन्दोहेत्यादौ केवलस्य दकारादेरावृत्तिसत्त्वात् । यत्राऽऽनुपूर्वीविशेषविशिष्टनानावर्णावृत्तिस्तत्र छेकानुप्रासः ।

यत्र केवलस्य वर्णस्य तत्र वृत्त्यनुप्रास इत्याह-**आवृत्तेति** ॥३॥ यत्राऽभिप्रायभेदेनोक्तस्यैव शब्दस्य प्रयोगः ।

लाटलक्षणदेशविशेषवल्लभत्वाल्लाटानुप्रास इत्याह-**लाटेति** ॥४॥ उदाहरति-**यत्रेति** । अत्र द्वितीयं जितं सफलमित्यभिप्रायभेदात् ।

स्फुटाऽनुप्रासलक्षणमाह-**श्लोकस्येति** ॥ ५ ॥ यो वर्णः प्रथमाऽर्द्धावसाने स एव चरमाऽर्द्धावऽसाने इत्येकः । चतुर्षु चरणावसानेष्वेको वर्ण इत्यपरः । एवमष्टमांशे ऽपि प्रान्तवर्णसाम्येन भेदो द्रष्टव्य इति भावः ।

अर्थाऽनुप्रासमाह-**उपमेयेति** ॥ ६ ॥ उदाहरति-**चन्दनमिति** । नाऽत्र छेकानुप्रासादिष्विव सान्निध्यकृतं रमणीयत्वं चन्दनवन्दनयोर्व्यवधानस्य सत्त्वात् । नाऽपि स्फुटानुप्रास इव नियतवर्णावृ-

पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम् ।
अंशुकान्तं शशी कुर्वन्नम्बरान्तमुपैत्यसौ ॥ ७ ॥
आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः ।
यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः ॥ ८ ॥
काव्यवित्प्रवरैश्चित्रं खङ्गबन्धादि लक्ष्यते ।
तेष्वाद्यमुच्यते श्लोकद्वयी सज्जनरञ्जिका ॥ ९ ॥
कामिनीव भवेत्खड्गलेखा चारुकरालिका ।
काश्मीरसेकरक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता ॥ १० ॥

---

स्या किन्त्वर्थसन्निधिस्तत्र चारुता । आवृत्तेश्चन्दनवन्दनयोर्न्यग्वधानस्योपमानोपमेययोर्भावेन सन्निधेः सत्त्वादिति भावः ।

पुनरुक्तप्रतीकाशमाह–**पुनरिति** ॥ ७ ॥ यत्राऽऽपातत एकोऽर्थः प्रतीयते स पुनरुक्तप्रतीकाश इत्यर्थः । अत्रांशुभिः कान्तं आकाशमिति द्वयोरर्थभेदेऽपि वसनान्तरूपैकार्थप्रतीतिरिति भावः ।

वर्णानां समूहो यत्र सर्वथा सम आवर्त्यते तत्र यमकम् । यथाऽत्रैव स्तावकं माधुर्यमाधुर्येति कवेः स्तुतिकन्दस्याङ्कुरं प्रथमा विदुः । धुर्यमाधुर्यवचस इत्याह–**आवृत्तेति** ॥ ८ ॥ यमकस्य परे प्रभेदा ग्रन्थान्तरादवगन्तव्याः । इदं तु अन्तादियमकम् ।

चित्रं काव्यं खङ्गबन्धादिभेदाभिन्नं, तत्र खङ्गबन्धमुदाहरति–**काव्यविदिति** ॥ ९ ॥ अमुना श्लोकद्वयेन स्थलविशेषरहिताक्षरेण खङ्गबन्धो भवति तल्लिखनक्रमो लिखितखङ्गबन्धादवसेयः । यत्संख्याकस्य वर्णस्याऽऽवृत्त्या अस्य खङ्गबन्धता साऽपि ग्रन्थान्तरादवसेया । बन्धान्तरं तु मूलग्रन्थोपेक्षितत्वादस्माभिरप्युपेक्षितमिति ।

कामिनीपक्षे चारुणी करालिके यस्याः, काश्मीरसेकेन रक्ताङ्गी खङ्गलेखापक्षे चारुकरालिका काश्मीरसेकादारक्ताङ्गीत्यभिप्रायः ॥ १० ॥

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव ॥ ११ ॥
उपमानोपमेयत्वे यत्रैकस्यैव जाग्रतः ।
इन्दुरिन्दुरिवेत्यादौ भवेदेवमनन्वयः ॥ १२ ॥
पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता ।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ १३ ॥
विख्यातस्योपमानस्य यत्र स्यादुपमेयता ।
इन्दुर्मुखमिवेत्यादौ स्यात्प्रतीपोपमा तदा ॥ १४ ॥
उपमाने तु लीलादिपदाढ्ये ललितोपमा ।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥ १५ ॥

---

अर्थाऽलङ्कारेषु प्रथममुपमामाह—**उपमेति** ॥ ११ ॥ यत्र द्व-योरर्थयोः सादृश्यं प्रतीयते तत्रोपमा कयोरिव स्तनयोरिवोदाहरणमप्ये-तदेव । द्वयोरित्यनेनोपमेयस्य स्तनयोरित्यनेनोपमानस्य प्रतीताविवेत्य-नेन प्रतीयमानसादृश्यप्रतीतेरिति भावः ।

यत्रोपमानोपमेययोरभेदो यथेन्दुरिन्दुरिवेत्यत्र । तत्राऽनन्वय इ-त्याह—**उपमानेति** ॥ १२ ॥

यत्र उपमेयस्यैवोपमानिता सा उपमेयोपमा । उदाहरणं **धर्म** **इति** ॥१३ ॥ उक्तक्रमेण प्रागुक्तस्य धर्मस्योपमेयस्यैवोत्तरत्र धर्म इवेत्युपमानता । तथाऽर्थस्योपमानस्यैव अर्थ इति उपमेयता अत्र प्र-तिभाति । अत्र धर्मो धर्म इव अर्थो अर्थ इवेत्युक्ते, अनन्वये ऽतिव्या-प्तिप्रसक्तिरित्यतो व्यवहितान्वयप्रसक्तिरित्यतश्च पर्यायेत्युक्तम् । पर्यायश्च प्रदर्शितोद्देश्यविधेयभावः ।

यत्रोपमानस्योपमेयता यथेन्दुर्मुखमिवेत्यत्र सा प्रतीपोपमेत्याह—**विख्यातस्येति** ॥ १४ ॥

यत्रोपमेये उपमानलीला वर्ण्यते तदा **ललितोपमेत्याह—उप-**

अनेकस्यार्थयुग्मस्य सादृश्यं स्तबकोपमा ।
श्रितोऽस्मि चरणौ विष्णोर्भृङ्गस्तामरसं यथा ॥ १६ ॥
स्यात्संपूर्णोपमा यत्र द्वयोरपि विधेयता ।
पद्मानीव विनिद्राणि नेत्राण्यासन्महन्मुखे ॥ १७ ॥
यत्रोपमानचित्रेण सर्वथाप्युपरज्यते ।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥ १८ ॥
समानधर्मयुक्साध्यारोपात्सोपाधिरूपकम् ।
उत्सिक्तक्षितिभृल्लक्ष्यपक्षच्छेदपुरन्दरः ॥ १९ ॥

---

**मानेति** ॥ १५ ॥ आद्ये युक्त इत्यर्थः । त्वन्नेत्रेत्युदाहरणम् ।

**अनेकस्येति** ॥ १६ ॥ यत्रोपमानोपमेययोरनेकत्वं तत्र **स्तबकोपमा** । यथा श्रित इत्यादौ । अत्र स्वापेक्षया भृङ्गः श्रीपतिचरणापेक्षया तामरसमुपमानत्वेनोपात्तमित्युपमानोपमेययोरनेकत्वम् । अर्थयुग्मस्योपमानोपमेयस्येति भावः ।

यत्रोपमानोपमेययोर्द्वयोरपि विधेयता सा सम्पूर्णोपमा । यथा पद्मानीवेत्यादौ । अत्रोभयस्याप्यासानिति क्रियान्वयेन विधेयत्वादित्याह—**स्यादिति** ॥ १७ ॥

उपमानचित्रेण यत्रोपमेयमयी भित्तिः सर्वथोपरज्यते **तद्रूपकम्** । उदाहरणमप्येतदेव । उपमानमेव चित्रमिति उपमेयमय्येव भित्तिरिति च रूपकप्रतीतेरित्यर्थः । यत्रोपमानोपमेययोर्भेदो न प्रतीयते तद्रूपकमिति भावः ॥ १८ ॥

यत्र समानधर्मोत्तरमुपमानवाचकशब्दप्रयोगस्तत्र **सोपाधिकरूपकमित्याह—समानेति** ॥ १९ ॥ रूपणीयस्यान्ते रूपकाभिधानं मुखचन्द्रेत्यादौ । अत्र तु रूप्यरूपकसाधारणस्य धर्मस्य प्रान्ते उत्सिक्तेत्यादिनोभयसाधारणधर्माभिधानोत्तरं पुरन्दर इति रूपकाभिधानादिति भावः । साध्यारोपात् कथनात् उत्सिक्तेत्यादावर्थभेदेनोभयसा-

पृथक्कथितसादृश्यं दृश्यं सादृश्यरूपकम् ।
उल्लसत्पञ्चशाखस्ते राजते भुजभूरुहः ॥ २० ॥
स्यादङ्गयष्टिरित्येवंविधमाभासरूपकम् ।
अङ्गयष्टिधनुर्वल्लीत्यादि रूपितरूपकम् ॥ २१ ॥
परिणामोऽनयोर्यस्मिन्नभेदः पर्यवस्यति ।
कान्तेन पृष्टा रहसि मौनमेवोत्तरं ददौ ॥ २२ ॥
बहुभिर्बहुधोल्लेखादेकस्योल्लेखिता मता ।
स्त्रीभिः कामः प्रियैश्चन्द्रः कालः शत्रुभिरैक्षि सः ॥२३॥

---

धारणधर्मप्राप्तिः स्फुटैव ।

यत्र सादृश्यं पृथक् कथ्यते **तत्सादृश्यरूपकं** ज्ञेयमित्याह—**पृथगिति** ॥ २० ॥ उदाहरणम्—**उल्लसदिति** । अत्र पञ्चशाखत्वं साधर्म्यं पृथगुच्यते न तु सोपाधिरूपकइव पदनिकटइति भावः ।

किञ्चिद्रूपकं रूपकान्तरं न सहते यथा कुचकलशकोकयुगलमिति । कलशकोकयोरेकरूपस्यैव रम्यत्वात् । किञ्चित्तु सहते, यथा—अङ्गयष्टिधनुर्वल्लीमादाय कुसुमायुधः । जगज्जयति यासां ताः कथं न सरसाः स्त्रियः । इत्यादौ । प्रत्युताऽङ्गधनुर्वल्लीमित्यरम्यं लिङ्गासङ्गासङ्गतेः । एवं च यत्र रूपितरूपकं सहते तदा सरूपक(?)मित्याह—**स्यादिति** ॥ २१ ॥

यत्र रूप्यरूपकयोर्व्यवधानेनाऽभिधानं स **परिणाम** इत्याह—**परिणाम** इति ॥ २२ ॥ यथा मौनोत्तरमित्यत्राऽभेदः प्रतीयते तथा नाऽत्र, किन्तु वाक्यमहिम्ना विलम्बेनेति परिणामोऽयमित्यर्थः । प्रकृतोदाहरणे एवशब्देन व्यवधानं द्रष्टव्यम् ।

यत्रैकस्मिन्ननेककर्तृकानेकधर्मारोपस्तत्रोल्लेखिता । यथा **स्त्रीभि**रित्यादौ । अत्र स्त्रीप्रियशत्रुभिः कामत्वचन्द्रत्वकालत्वारोपादित्याह—**बहुभिरिति** ॥ २३ ॥

अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥ २४ ॥
पर्यस्तापह्नुतिर्यत्र धर्ममात्रं निषिध्यते ।
नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम् ॥ २५ ॥
भ्रान्तापह्नुतिरन्यस्य शङ्कया तथ्यनिर्णये ।
तापं तनोति सोत्कम्पं ज्वरः किं न सखि स्मरः ॥२६॥

---

यत्राऽतथ्यस्यारोपणाय तथ्यस्य निरसनं क्रियते सा ऽपन्हुतिः । यथा **नाऽयमि**त्यादौ । अत्र सरोरुहत्वस्यारोपाय विद्यमानस्य चन्द्रत्वस्य निषेधादित्याह—**अतथ्यमिति** ॥ २४ ॥

**पर्यस्तापन्हुतिमाह—पर्यस्तापन्हुतिरिति** ॥ २५ ॥ पूर्वत्र चन्द्रमसि सुधांशुत्वधर्मनिषेधे सरोरुहत्वमारोप्यते तत्र तु नाऽयं सुधांशुरिति सुधांशौ सुधांशुत्वनिषेधे प्रेयसीमुखे सुधांशुत्वारोपः । एवं च यत्र प्रकृतधर्मिणि विद्यमानो धर्मो निषिध्यते, धर्मान्तरे समारोप्यते सा पर्यस्तापन्हुतिः । यत्र तु धर्मिणि विद्यमानं धर्मं निषिध्य धर्मान्तरारोपः सा ऽपन्हुतिरेव । पर्यस्तापन्हुतौ धर्मनिषेधः कथमिति चेत् प्रकृतधर्मधर्मित्वनिषेधएव तात्पर्यात्तस्य च प्रकृतोदाहरणे स्फुटत्वात् । अयं तु सुधांशुर्न किन्तु प्रेयसीमुखं सुधांशुरिति प्रतीतेर्जायमानत्वादिति भावः ॥

यत्र कश्चिद् भ्रान्त्या ऽन्यदारोपयति परस्तु तथ्यकथनेन तं निषेधति तत्र भ्रान्तापन्हुतिरित्याह—**भ्रान्तेति** ॥ २६ ॥ अन्येनाऽन्यस्मिन् शङ्क्यमाने च तथ्यनिर्णय इत्यर्थः । **ताप इति** । कस्याश्चिच्छरीरे सोत्कम्पतापमुपलभ्य काचिदित्थं शङ्कते स्मरादन्यतोऽपि तापो भवति तत्किं सोत्कम्पं यथा स्यात्तथा तव शरीरे ज्वर इति परस्त्वादिह न स्मर इति । अत्राऽतथ्यज्वरनिरासेन तथ्यज्वरस्मरज्वरव्यवस्थापनात् ।

छेकापह्नुतिरन्यस्य शङ्कया तथ्यनिह्नवे ।
प्रजल्पन्मत्पदे लग्नः कान्तः किं न हि नूपुरः ॥ २७ ॥
कैतवापह्नुतिर्व्यक्तं व्याजाद्यैर्निह्नवे पदैः ।
निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ॥ २८ ॥
उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना ।
त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ॥ २९ ॥
इवादिकपदाभावे गूढोत्प्रेक्षां प्रचक्षते ।
यत्कीर्तिर्विभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम् ॥ ३० ॥
स्यात्स्मृतिभ्रान्तिसंदेहैस्तदेवालंकृतित्रयम् ।

---

यत्र परभीत्याऽन्यारोपणेन तथ्यनिरासः सा **छेकापन्हुतिरि**त्याह—**छेकेति** ॥ ३७ ॥ **प्रजल्पन्निति** । मत्पदे लग्न इति तयोक्ते कान्तः किमित्यन्ययोक्ते भीता सा नूपुरारोपेण तथ्यं कान्तमपलपतीत्यर्थः ।

व्याजाद्यैः पदैरपह्नुतेर्व्यज्यमानत्वे **कैतवापन्हुतिरि**त्याह—**निर्यान्तीति** ॥ २८ ॥ कैतवादित्यनेन दृक्प्रान्तनिह्नवः ।

यत्र तथ्यनिषेधं विना ऽतथ्यारोपः सोत्प्रेक्षा, निन्हुतिस्तु तथ्यनिषेधे सति इति भेदः, इत्यभिप्रायवानाह—**उत्प्रेक्षेति** ॥२९॥ यत्राऽपन्हुतिनिषेधं विना हेत्वादिरुन्नीयते **सोत्प्रेक्षा** इत्यर्थः । **त्वन्मुखेति** । अत्र स्वभावासिद्धे पद्मैश्चन्द्रस्य वैरे त्वन्मुखेत्यादिना हेतुरुत्प्रेक्ष्यते । मम शोभा केवला न पर्याप्तेति पद्मशोभाग्रहणाय तेन वैरं करोतीत्याशयः । इयमुत्प्रेक्षाक्षरमिति पदस्योत्प्रेक्षाव्यञ्जकरहिता तु गूढेत्याह—**इवादीति** ॥ ३० ॥ अत्राऽशेषभुवनपर्यटनरूपाविलासश्रान्तायाः कीर्तेर्गङ्गावगाहनमुत्प्रेक्ष्यते । न च मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः शब्दाः व्यञ्जकाः सन्तीति भावः ॥

स्मृतिभ्रान्तिसन्देहेषु यत्र यद्वर्ण्यते तत्र स एवालङ्कार इत्याह—

अत्यन्तातिशयोक्तिस्तत्पौर्वापर्यव्यतिक्रमे ।
अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ४२ ॥
[1]भेदकातिशयोक्तिश्चेदेकस्यैवान्यतोच्यते ।
अहो अन्यैव लावण्यलीला बालाकुचस्थले ॥ ४३ ॥
रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगम् ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ॥ ४४ ॥
प्रौढोक्तिस्तदशक्तस्य तच्छक्तत्वावकल्पनम् ।
कलिन्दजातीररुहाः श्यामलाः सरलद्रुमाः ॥ ४५ ॥

---

यत्र कार्यमेव पूर्वमुच्यते सा ऽत्यन्तातिशयोक्तिः । यथा ऽग्रे–इत्यादौ । अत्राऽनुनयस्य कारणस्य पूर्वं मानभङ्गकार्यवर्णनादित्याह—**अत्यन्तेति** ॥ ४२ ॥

यत्र तस्मादेव तस्य भेद उच्यते सा **भेदकातिशयोक्तिः** । यथा ऽहो- इत्यादौ । लावण्यलीलाया लावण्यलीलात एव भेदप्रतिपादनादित्याह—**भेदकेति** ॥ ४३ ॥

यत्र रूपकान्तः स्थितं रूप्यं तत्र **रूपकातिशयोक्तिः** । यथा **पश्येत्यादौ** । अत्र नीलोत्पलशराभ्यां रूपकाभ्यामेव लोचनकटाक्षरूपस्य रूप्यस्य प्रतीतेः पृथक्पदेनाऽनभिधानादित्याह— **रूपकेति** ॥ ४४ ॥

तत्राऽसमर्थस्य सामर्थ्यवर्णने **प्रौढोक्तिः** ॥ ४५ ॥ यथा स्फटिकस्थिते जलश्वैत्ये इत्थं यदि स्यात्तदेत्थं स्यादिति सम्भावनम् । यथा स्फटिकस्थितिश्वेतजलसिक्तमौक्तिकप्रसूता लता चेत्स्यात्तदा तत्पुष्पैस्ते

---

१ चपलातिशयोक्तिसम्बन्धातिशयोक्तिरूपं भेदद्वयं टीकान्तरे धृतमस्ति । तत्र मूलेऽपि श्लोकद्वयमधिकमुपलभ्यते । प्रकृतटीकाकृदसम्मतत्वादिह नोपन्यस्तम् ।

सम्भावनं यदीत्थं स्यादित्यूहोऽन्यप्रसिद्धये ।
सिक्तं स्फटिककुम्भान्तःस्थितिश्वेतीकृतैर्जलैः ॥ ४६ ॥
मौक्तिकं चेल्लता सूते तत्पुष्पैस्ते समं यशः ।
वांछितादधिकप्राप्तिरयत्नेन प्रहर्षणम् ॥ ४७ ॥
दीपमुद्द्योतयेद्यावत्तावदभ्युदितो रविः ।
इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम् ॥ ४८ ॥
दीपमुद्द्योतयेद्यावत्तावन्निर्वाण एव सः ।
क्रियादिभिरनेकस्य तुल्यता तुल्ययोगिता ॥ ४९ ॥
सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ।
प्राचीनाचलचूडाग्रचुम्बिबिम्बे सुधाकरे ॥ ५० ॥
प्रस्तुताप्रस्तुतानां च तुल्यत्वे दीपकं मतम् ।
मेधां बुधः सुधामिन्दुर्बिभर्ति वसुधां भवान् ॥ ५१ ॥
आवृत्ते दीपकपदे भवेदावृत्तिदीपकम् ।
दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्विषा ॥५२॥

---

यशः समं स्यादित्याह—**सम्भावनमिति** ॥ ४६ ॥

**वाञ्छितेति** ॥ ४७ ॥

इष्यमाणाद्विरुद्धोऽर्थो यत्र प्राप्यते तद्विषादनमित्याह—**इष्यमाणेति** ॥ ४८ ॥

यत्राऽनेकस्यैकक्रियादिभिः सम्बन्धस्तत्र **तुल्ययोगिता** । यथा **सङ्कुचन्तीत्यादौ** । अत्र सति चन्द्रोदये पद्मस्वैरिणीवदनयोः सङ्कोचवर्णनादित्याह—**सङ्कुचन्तीति** ॥ ४९ ॥

तुल्ययोगितायां प्रस्तुतानामेवैकक्रियादिसम्बन्धः । पङ्कजानामिव स्वैरिणीमुखानां तदा प्रस्तुतत्वात् । दीपके प्रस्तुताप्रस्तुतयोस्तमाह — **प्रस्तुतेति** ॥ ५१ ॥ **मेधामिति** । अत्र राजैव प्रस्तुतः ।

क्रियावाचकपदावृत्तावावृत्तिदीपकम् । यथा **दीप्त्येत्यादी**-त्याह—**आवृत्त इति** ॥ ५२ ॥

वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता ।
तापेन भ्राजते सूरः शूरश्चापेन राजते ॥ ५३ ॥
चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलंकृतिः ।
स्यान्मल्लप्रतिमल्लत्वे सङ्ग्रामोद्दामहुंकृतिः ॥ ५४ ॥
दृष्टान्तश्चेद्भवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः ।
जाता चेत्प्राक् प्रभा भानोस्तर्हि याता विभावरी ॥५५॥

---

यत्र वाक्ययोरर्थयोः साम्यं भवति तत्र **प्रतिवस्तूपमा** । यथा **तापेनेति** । अत्र तापेनौष्ण्येन सूर्यो राजत इति प्रथमवाक्यार्थः । धनुषा शूरो राजत इति द्वितीयः । अनयोः साम्यं प्रतिवस्तूपमा । अत्र तापधनुषोः सूरशूरयोः शोभयोश्च परस्परं साम्यात् । एवं च यत्र यत्र वाक्यद्वयगतानां पदार्थानां सर्वेषां परस्परं साम्यं तत्र प्रतिवस्तूपमेति सारम् । ५३ ।

**दृष्टान्तमाह—चेदिति** ॥ ५४ ॥ बिम्बप्रतिबिम्बभावश्चेत् द्वयोस्तदा तयो**र्दृष्टान्तो**ऽलङ्कृतिः । मल्लप्रतिमल्लत्वे तु तयोः सङ्ग्रामे उद्दामालङ्कृतिरित्यर्थः । यथा बिम्बप्रतिबिम्बयोरेका छाया तथा यत्र वाक्यार्थयोरेका छाया भवति तत्र बिम्बप्रतिबिम्बभावस्तयोः । यथा प्रकृतएव श्लोके । तथा हि –बिम्बप्रतिबिम्बभावश्चेद्वाक्यार्थयोस्तदा तयोर्दृष्टान्तोऽलङ्कृतिः स्यादिति पूर्वार्द्धोऽर्थः । अनयोः समच्छायत्वमस्त्येव चेदिति असावलङ्कृतिरिति द्विवचनस्य चोभयत्राऽन्वयादीदृशि स्थले दृष्टान्तो ऽलङ्कृतिरिति युक्तमेव । यथा सङ्ग्रामोद्दामहुङ्कृतिः मल्लादित्वेऽलङ्कृतिस्तथा प्रकृते दृष्टान्त इति दृष्टान्तदार्ष्टान्तिकभावस्य स्फुटमवभासनात् ।

उदाहरणाऽन्तरमाह—**दृष्टेति** ॥ ५५ ॥ कस्य चिद्भक्तस्य नारायणं प्रत्युक्तिः । अन्तर्हृदि भवन्मूर्तिश्च दृष्टा इत्यादिरर्थः ।

वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।
या दातुः सौम्यता सेयं सुधांशोरकलङ्कता ॥ ५६ ॥
व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
शैला इवोन्नताः सन्तः किं तु प्रकृतिकोमलाः ॥५७॥
सहोक्तिः सहभावश्चेद्भासते जनरंजनः ।
दिगन्तमगमद्यस्य कीर्तिः प्रत्यर्थिभिः सह ॥ ५८ ॥
विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ।
विद्या हृद्यापि सावद्या विना विनयसम्पदम् ॥ ५९ ॥
समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥ ६० ॥

---

यत्र सादृश्याद्वाक्यार्थयोरैक्यमारोप्यते सा **निदर्शना** । यथा **येत्यादि** । दातृसौम्यताचन्द्राकलङ्कतयोर्वाक्यार्थयोरसम्भावितत्वेन समयोरैक्यारोपस्य स्फुटत्वादिदमुभयमपि असत्त्वेनैकमित्यर्थः ॥ ५६ ॥

उपमानाऽपेक्षयोपमेयस्य विशेषे **व्यतिरेकः** । यथा **शैला इवेत्यादौ** । अत्र ह्युन्नतत्वेन साम्ये सति सकोमलत्वेन विशेषोपादानात् इत्याह—**व्यतिरेक इति** ॥ ५७ ॥

जनमनोहारी यत्र सहभावस्तत्र **सहोक्तिः** । यथा-**दिगन्तमित्यादि** । पुत्रेण सहागत इत्यादिवारणाय जनरञ्जन इति । अत्र चमत्कारविशेषाभावादित्याह—**सहोक्तिरिति** ॥ ५८ ॥

केन चिद्विना यत्र प्रस्तुतहीनता तत्र **विनोक्तिः** । यथा-विनयं विना विद्याया इत्याह—**विनोक्तिरिति** ॥ ५९ ॥

यत्र प्रस्तुतवर्णनयैवाऽप्रस्तुतमवगम्यते सा **समासोक्तिः** । **यथा ऽयमित्यादौ** । अत्र प्रस्तुतविशेषणमहिम्नैव कामिनीमुखचुम्बनस्य प्राप्तेरित्याह—**समासेति** ॥ ६० ॥

खण्डश्लेषः पदानां चेदेकैकं पृथगर्थता ।
उच्छलद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥ ६१ ॥
भङ्गश्लेषः पदस्तोमस्यैव चेत्पृथगर्थता ।
अजरामरता कस्य नायोध्येव पुरी प्रिया ॥ ६२ ॥
अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थसंश्रयः ।
कुटिलाः श्यामला दीर्घाः कटाक्षाः कुन्तलाश्च ते ॥६३॥
अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा ।

---

यत्र पदं प्रत्येकं भिन्नार्थं स खण्डश्लेषः । यथोच्छलदित्यादौ। अत्र कीलालपदस्य रुधिरजलार्थत्वात् । वाहिनीपतिशब्दस्य सेनापतिसरित्पत्यर्थत्वादित्याह— **खण्डश्लेष इति** ॥ ६१ ॥

यत्राऽर्थद्वयं पदसमुदायस्य स **भङ्गश्लेषः** । यथाऽजरेत्यत्र । अतीतजरता ऽमरता ऽजरामाश्रया रतिरित्यर्थद्वयस्य समुदायेनाप्तेरित्याह— **भङ्गश्लेष इति** ॥ ६२ ॥ यथा ऽयोध्या पुरी अजरामयो रता प्रिया तथा ऽजरामरभावः कस्य न प्रिय इति भावः । अत्र यस्य पदस्यैकोऽर्थ एव नापरो ऽपि तु समुदायेनार्थद्वयं प्रत्याय्यते इति स भङ्गश्लेष इत्याशयः ।

यत्र विशेष्यपदयोर्भिन्नयोरर्थयोर्विशेषणपदार्थां अभिन्ना अनेकेऽन्विताः सोऽ**र्थश्लेषः** । यथा कटाक्षकुन्तलयोः कुटिलत्वादय इत्याह— **अर्थश्लेष इति** ॥ ६३ ॥

यत्राऽप्रस्तुतप्रशंसा ऽप्रस्तुतकथा प्रस्तुतानुगा प्रस्तुते पर्यवस्यति साऽप्रस्तुतप्रशंसा स्यात् । यथा—**कमलै**रित्यादि । अत्र प्रस्तुतानां धनवतां कथया प्रस्तुतकमलकथेत्याह— **अप्रस्तुतप्रशंसेति** ॥ ६४ ॥ एषा च कार्ये ऽप्रस्तुते कारणाऽभिधानं कारणे कार्याभिधानं विशेषसामान्यस्य सामान्यविशेषस्याभिधानमिति रूपा । तत्र व्यवसायिनां किमपि न दुष्करमिति सामान्ये प्रस्तुते अप्यम्बुधेरिति

कार्यकारणसामान्यविशेषादेरसौ मता ॥ ६४ ॥
कमलैः कमलावासैः किं किं नासादि सुन्दरम् ।
अप्यम्बुधेः परं पारं प्रयान्ति व्यवसायिनः ॥ ३५ ॥
भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा ।
हनूमानब्धिमतरद् दुष्करं किं महात्मनाम् ॥ ६६ ॥
यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ।
स न जिग्ये महान्तो हि दुर्धर्षाः क्ष्माधरा इव ॥ ६७ ॥
कार्याद्यैः प्रस्तुतैरुक्तैः पर्यायोक्तिं प्रचक्षते ।
तृणान्यङ्कुरयामास विपक्षनृपसद्मसु ॥ ६८ ॥
उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।
कस्ते विवेको नयसि स्वर्गं पातकिनोऽपि यत् ॥ ६९ ॥

---

विशेषस्याभिधानमित्याह—**कार्येति** ॥

अर्थान्तरन्यासमाह—**भवेदिति** ॥ ६६ ॥ यत्र मुख्येनार्थेनानुषक्तं साहितमर्थान्तरमभिधीयत इत्यर्थः । उदाहरणम्-**हनुमानिति** । अत्र दुष्करं किं महात्मनामिति मुख्योऽर्थस्तत्सहितं हनुमानित्याद्यभिहितम् । यद्वा ऽनुषक्तं मुख्यार्थस्य साधकं दुष्करं किं महात्मनामित्यस्य हनुमानित्यनेन साधनात् ।

यस्मिन्प्रथमतो विशेषः पश्चात्सामान्यं ततो विशेषः स विकस्वरालङ्कारः । यथा-**स न जिग्ये** इत्यादौ । अत्र केनचित्सः कश्चिदतिक्रान्तो न जिग्ये न जित इति विशेषः । महान्तो दुर्द्धर्षा इति सामान्यं क्ष्माधरा इति विशेषः ॥ ६७ ॥

प्रस्तुतैः कार्याद्यैर्यत्र प्रस्तुतमेव कारणाद्युच्यते तत्र **पर्यायोक्तिः** यथा—**तृणानीति** । अत्र तृणेन कार्येण शत्रूणामुत्सादनं कारणमुच्यते । अत्रोभयोः प्रस्तुतत्वात् नाप्रस्तुतप्रशंसालङ्कारः ।

निन्दया स्तुतेः स्तुत्या वा निन्दाया उक्तिः **व्याजस्तु-**

आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात् ।
चन्द्र संदर्शयात्मानमथवास्ति प्रियामुखम् ॥ ७० ॥
गूढाक्षेपो विधौ व्यक्ते निषेधे चास्फुटे सति ।
हर सीतां सुखं, किं तु चिन्तयान्तकढौकनम् ॥ ७१ ॥
विरोधोऽनुपपत्तिश्चेद् गुणद्रव्यक्रियादिषु ।
अमन्दचन्दनस्यन्दः स्वच्छन्दं दन्दहीति माम् ॥७२॥
श्लेषादिभूर्विरोधश्चेद्विरोधाभासता मता ।

---

**तिः** ॥ ६९ ॥ एकत्र व्याजेन स्तुतिः परत्र व्याजरूपा स्तुतिः । तत्राद्या क इत्यादौ । अत्र गङ्गाया निन्दाव्याजेन स्तुतिः । अत्र निन्दा स्तुतिपर्यवसन्ना । द्वितीयायां स्तुतिर्निन्दापर्यवसन्ना । यथा–

खलाः किल कलौ काले केवलं न क्षतव्रताः ।
ये मौनमुद्रां मुञ्चन्ति न कदाचित्परस्तवे ॥ इत्याह—**उक्तिरिति** ।

प्रयुक्तस्य यो विचारेण प्रतिषेधः स **आक्षेपः** । यथा–**चन्द्रे-त्यादौ** । अत्र प्रथमतश्चन्द्रदर्शनविधिः पश्चात्प्रियामुखे जायिनि सति नोचितमिति प्रतिषेध इत्याह—**आक्षेप इति** ॥ ७० ॥

यत्र विधिः प्रकटः निषेधस्त्वस्फुटः स **गूढाक्षेपः** । यथा–सीताहरणोन्मुखं रावणं प्रति मारीचोक्तिः । अत्र हरेत्यादिना विधेः स्फुटत्वात् । चिन्तयेत्यादिना मृत्युभयप्रदर्शनेन निषेधस्याऽस्फुटत्वादित्याह—**गूढेति** ॥ ७१ ॥

यत्र द्रव्यगुणक्रियादीनां विरोधस्तत्र **विरोधः** । यथा–चन्दनदाहकत्वे इत्याह—**विरोध इति** ॥ ७२ ॥

यत्र श्लेषकृतो विरोधस्तत्र **विरोधाभासः** । यथाऽपीत्यादौ । अत्राऽन्धकस्यारिरिति विरोधाभावे ऽप्यन्धकारवानित्यर्थविरोधस्य स्फुटत्वात्तात्पर्यविषयीभूतार्थभिन्नस्य विरुद्धस्यार्थस्य प्रतीयमानत्वादन्ध-

अप्यन्धकारिणाऽनेन जगदेतत्प्रकाश्यते ॥ ७३ ॥
असंभवोऽर्थनिष्पत्तावसंभाव्यत्ववर्णनम् ।
को वेद गोपशिशुकः शैलमुत्पाटयिष्यति ॥ ७४ ॥
विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ।
पश्य लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् ॥ ७५ ॥
विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ।
नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥ ७६ ॥
आख्याते भिन्नदेशत्वे कार्यहेत्वोरसंगतिः ।
त्वद्भक्तानां नमत्यङ्गं भङ्गमेति भवक्रमः ॥ ७७ ॥

---

कारविशिष्टेन प्रकाशासम्भवादित्याह—**श्लेषेति** ॥ ७३ ॥

एवमादिपदग्राह्ये यत्रार्थे निष्पन्ने इदमसम्भावितमनेन कृतमिति प्रभृति वर्ण्यते सोऽ**सम्भवः** । यथा—अल्पवयसा नारायणेन गोवर्द्धने करेणोद्धृते **को** वेदेत्यादिर्गोपानामुक्तिरित्याह—**असम्भव इति** ॥ ७४ ॥

यत्र कारणं विना कार्यनिष्पत्तिर्वर्ण्यते सा **विभावना** । यथा-**पश्येत्यादौ** । अत्र लाक्षायोगकारणाभावे ऽपि चरणयो रक्तता-कार्यवर्णनादित्याह-**विभावनेति** ॥ ७५ ॥ रसासिक्तम् ।

कारणे सति कार्यानुत्पत्तिर्**विशेषोक्तिः** । यथा—**नमन्त**मित्यादौ । नतो हि लङ्घयितुं शक्यते खर्वत्वात् । नतत्वरूपे कारणे सत्यपि लङ्घनरूपकार्याभाव इत्याह—**विशेषेति** ॥ ७६ ॥

यत्र कार्यहेत्वोर्वैयधिकरण्यं वर्ण्यते तत्राऽ**सङ्गतिः** । यथा—**त्वद्वि त्यादौ** । अत्र नमनस्य कारणस्य भक्ताङ्गे वर्णनात्कार्यस्य भङ्गस्य भवक्रमे वर्णनादित्याह—**आख्यातेति** ॥ ७७ ॥

यत्र भिन्नो देशो न ख्यातस्तत्रैव वैयधिकरण्ये ऽसङ्गतिः । यत्र तु

विषमं यद्यनौचित्यादनेकान्वयकल्पनम् ।
क्वातितीव्रविषाः सर्पाः क्वासौ चन्दनभूरुहः ॥ ७८ ॥
सममौचित्यतोऽनेकवस्तुसम्बन्धवर्णनम् ।
अनुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥ ७९ ॥
विचित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः ।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ॥ ८० ॥
अधिकं बोध्यमाधारादाधेयाधिकवर्णनम् ।
यया व्याप्तं जगत्तस्यां वाचि मान्ति न ते गुणाः ॥८१॥
अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् ।
त्रियामा शशिना भाति शशी भाति त्रियामया ॥ ८२ ॥

---

ख्यास्तत्र नाऽसङ्गतिः । यथा—

भ्रूचापवल्लीं सुमुखी यावन्नयति वक्रताम् ।
तावत्कटाक्षविशिखैर्भिद्यते हृदयं मम ।

इत्यत्र वक्रतारूपस्य कारणस्य धनुर्वल्ल्यां भेदस्य च कार्यस्य भेद्यएव दृष्टत्वेन वैयधिकरण्यस्य ख्यातत्वान्नासङ्गतिरिति भावः ।

अनुचितयोरन्वयवर्णनं **विषमम्** । यथा–चन्दनभुजगयोरित्याह–**विषममिति** ॥ ७८ ॥

उचितत्ववर्णनात्**समम्** । यथा–हाराणां स्तनमण्डलेष्वित्याह–**सममिति** ॥ ७९ ॥

यत्रैकक्रियानुकूलः प्रयत्नस्तद्विरुद्धां क्रियां सृजति तत्र **विचित्रम्** । यथा विनयादुन्नतिप्राप्तावित्याह —**विचित्रमिति** ॥ ८० ॥

यत्राऽऽधारस्याधिक्यमुपवर्ण्याऽऽधेयस्य तद्वर्ण्यते तत्राऽ**धिकम्** । यथा–जगद्व्याप्त्या वाचामाधाराणामाधिक्यमुक्त्वा ऽऽधेयानां गुणानामाधिक्यवर्णनमित्याह—**अधिकमिति** ॥ ८१ ॥

यत्र द्वयोः परस्परमुपकारकत्वं तत्राऽ**न्योन्यम्** । यथा निशाश-

विशेषः ख्यातमाधारं विनाऽप्याधेयवर्णनम् ।
गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तस्कराः ॥ ८३ ॥
व्याघातोऽन्यथाकारि वस्त्वन्यक्रियमुच्यते ।
यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ॥ ८४ ॥
गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः ।
नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥ ८५ ॥
गृहीतमुक्तरीत्यर्थश्रेणिरेकावली मता ।
नेत्रे कर्णान्तविश्रान्ते कर्णौ दोर्मूलदोलिनौ ॥ ८६ ॥

---

शिनोः परस्परशोभाऽऽधायकत्वमित्याह–**अन्योन्यमिति** ॥ ८२ ॥

प्रसिद्धमाधारं विना ऽऽधेयवर्णनं **विशेषः** । यथा विना भास्वन्तं तस्करवर्णन इत्याह–**विशेषइति** ॥ ८३ ॥

यत्राऽन्यक्रियासमर्थमन्यक्रियासमर्थत्वेन वर्ण्यते तत्र क्रिययोर्विरोधो **व्याघातः** । यथा–प्रीतिसमर्थैः कुसुमैर्मारणवर्णनमित्याह–**व्यादिति** ॥ ८४ ॥

यथा प्राक्कारणैश्च यथा प्रान्तकारणैश्च गुम्फः **कारणमाला** । यत्र पूर्वं पूर्वं कारणं तत्र यथाप्राक्कारणैर्गुम्फः । यथा **नयेने**त्यादौ । नयश्रीत्यागानां कारणानां पूर्वमुपादानात् अग्रे ऽग्रे कारणवर्णने यथा प्रान्तकारणानाम्–

यशस्त्यागात् श्रिया त्यागः श्रीर्नयेन महीयसा । इत्यत्र ।

अत्र पूर्वं नयः श्रीकारणं श्रीस्त्यागकारणं त्यागो यशःकारणमित्यग्रिमाग्रिमं प्रति पूर्वं पूर्वपूर्वकारणत्वेनोपात्तमित्याह–**गुम्फ इति** ॥८५॥

**एकावली** तु यत्रार्थश्रेणिर्गृहीतमुक्तरीतिंगता भवति । यथा–**नेत्रेत्यादौ** । नेत्रे कर्णान्तविश्रान्ते इत्यनेनोक्तयोर्नेत्रकर्णयोर्मध्ये नेत्रस्य त्यागोऽपि कर्णस्याऽग्रहणात् । एवं च गृहीतं मुक्तं च यथा सा गृहीतमुक्ता रीतिस्तस्यामर्थश्रेणिरेकावलीत्याह–**गृहीतेति** ॥ ८६ ॥

दीपकैकावलीयोगान्मालादीपकमुच्यते ।
स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥ ८७ ॥
सारो नाम पदोत्कर्षः सारता च यथोत्तरम् ।
सारं सारस्वतं तत्र काव्यं तत्र शिवस्तवः ॥ ८८ ॥
उदारसारश्चेद्भाति भिन्नोऽभिन्नतया गुणः ।
मधुरं मधु पीयूषं तस्मात्तस्मात्कवेर्वचः ॥ ८९ ॥
यथासंख्यं द्विधार्थाश्चेत्क्रमादेकैकमन्विताः ।

---

दोःस्तम्भौ जानुपर्यन्तप्रलम्बौ तस्य भूभुजः । इत्युत्तरार्द्धम् ।

यत्र दीपकैकावल्योर्योगस्तन्**मालादीपकम्** ॥ ८७ ॥ यथा-**स्मरेणे**त्यादौ । तस्या हृदये स्मरेण स्थितिः कृता हृदयेन च त्वयि तस्या मनस्त्वय्येव लग्नं तिष्ठतीत्यर्थः । अत्र दीपकं स्फुटमेव स्थितिरित्यस्योभयत्राऽन्वयात् । एकावल्यपि स्मरस्य गृहीतस्याऽग्रे त्यागात् । गृहीतमेवाऽग्रे त्यज्यते यत्र तद् गृहीतमुक्तमित्य**न्ये** ।

यत्रोत्कर्षरूपा सारता यथोत्तरं तत्र **सारः** । न च चकाराऽनुपपत्तिः । उत्कर्षश्च सारतोत्कर्षरूपा च सारता यथोत्तरमित्यर्थकरणात् । चकारस्य स्वर्थत्वात् अन्यसारतानिषेधात् । यथा-**सार**मित्यादौ । अत्र सारस्वतकाव्यशिवस्तवानां यथोत्तरमुत्कर्षादित्याह-**सार इति** ॥८८॥ उत्कर्षेत्यनेनाऽपकर्षमादाय सारतायां न सार इत्युक्तमिति भावः ।

यत्रोत्कृष्टत्वेन वर्ण्यमानो भिन्नो ऽभिन्नत्वेन प्रतीयते स **उदारसारः** । यथा मध्वाद्यपेक्षया वर्ण्यमानं कवित्वमाधुर्यं श्रोत्रग्राह्यतया रसनग्राह्यात्तस्माद्भिन्नमपि मधुरत्वेनैकतया व्यपदिश्यत इत्याह—**उदारेति** ॥ ८९ ॥

क्रमिकाणां क्रमिकेष्वन्वयो **यथासङ्ख्यम्** । यथा शत्रुं जय मित्रं रञ्जय विपच्छत्रं विपदावृतत्वं वर्जयेत्यत्रेत्याह—**यथासङ्-**

---

१ सारतायां यथोत्तरमिति टीकान्तरसंमतः पाठः ।

शत्रुं मित्रं द्विषत्पक्षं जय रञ्जय भञ्जय ॥ ९० ॥
पर्यायश्चेदनेकत्र स्यादेकस्य समन्वयः ।
पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा ॥ ९१ ॥
परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ।
जग्राहैकं शरं मुक्त्वा कटाक्षान् शत्रुयोषिताम् ॥ ९२ ॥
भूयसामेकसंबन्धभाजां गुम्फः समुच्चयः ।
नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः ॥९३॥
समाधिः कार्यसौकर्यं कारणान्तरसंनिधेः ।
उत्कण्ठितां च कलयन् जगामास्तं च भानुमान् ॥९४॥

---

**ण्यमिति** ॥ ९० ॥

एकस्याऽनेकत्र क्रमेण वृत्तौ **पर्यायः** । यथा मुखोपमायाः पूर्वं कमले पश्चाच्चन्द्रे इत्याह-**पर्याय इति** ॥ ९१ ॥

यत्र न्यूनाधिकयोरेकं दत्वा परं गृह्यते तत्र **परिवृत्तिः** । यथैकशरदानेनाऽनेककटाक्षप्राप्तिरित्याह—**परिवृत्तिरिति** ॥ ९२ ॥ एकशरेण शत्रून्निहत्य तदीयस्त्रीणां कटाक्षभाजनं त्वं जात इत्यर्थः ।

एकसम्बन्धानां बहूनां वर्णने **समुच्चयः** । यथा-**नश्यन्ती**त्यत्र । तत्र नाशादीनां बहूनामेकशत्रुगतत्वेन वर्णनादित्याह-**भूयसामिति** ॥ ९३ ॥

यत्र कर्तव्यस्य कार्यस्य केनाचित्कारणेन सुकरता तत्र **समाधिः** । यथोत्**कण्ठिता**मित्यादौ । अत्राऽभिसारिकासमुत्सुकस्य नायकस्याऽर्थसिद्धिः सूर्यास्तमयेन घटितेत्याह-**समाधिरिति** ॥९४॥

यत्र बलवतः शत्रोः पराभवेऽक्षमेण तदीयस्य पराभवो वर्ण्य-

---

१ परिसङ्ख्याविकल्परूपालङ्कारद्वयं मूलेऽपि लक्षितं टीकान्तरेऽपि व्याख्यातमस्ति, परन्तु प्रकृतटीकाकृदसम्मतत्वादिह नोपन्यस्तम् ।

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ ॥ ९५ ॥
प्रतीपमुपमानस्य हीनत्वमुपमेयतः ।
दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना ॥ ९६ ॥
उल्लासोऽन्यमहिम्ना चेद्दोषो ह्यन्यत्र वर्ण्यते ।
तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम् ॥ ९७ ॥
तद्गुणः स्वगुणत्यागादन्यतः स्वगुणोदयः ।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥ ९८ ॥
यद्वस्तुनोऽन्यथारूपं तथा स्यात्पूर्वरूपता ।
दीपे निर्वापिते ह्यासीत्काञ्चीरत्नैरहर्महः ॥ ९९ ॥

---

ते तत्र **प्रत्यनीकम्** । यथा–**जैत्रे**त्यादौ । अत्रोत्पलाभ्यां स्वजैत्रे नेत्रे जेतुमशक्ये नेत्रयोः कर्णान्तविश्रान्ततया अनुगतौ कर्णौ भूषणतयाऽधरीकृताविति वर्णनादित्याह–**प्रत्यनीकमिति** ॥ ९५ ॥

उपमेयाऽपेक्षयोपमानस्य हीनतावर्णने **प्रतीपम्** । मुखापेक्षया चन्द्रादेरित्याह–**प्रतीपमिति** ॥ ९६ ॥

यत्राऽन्यगुणेनाऽन्यत्र दोषो वर्ण्यते तत्रो**ल्लासः** । सज्जने गुणधरे न दोषः, धनानामेवासौ दोषो यदीदृशगुणवदनाश्रयणमिति । निर्गुणाश्रयणे तु न दोषो वर्ण्यते–इत्याह–**उल्लासइति** ॥ ९७ ॥

यत्राऽन्ययोगेनाऽन्यथाभूतं पुनरन्ययोगेन तथैव वर्ण्यते तत्र **तद्गुणः** । यथा ऽत्र मेचकीभूतस्य शेषस्य हरकण्ठरुचा नीलतां नीतस्य कस्यचिद्राज्ञो यशसा शुभ्रताप्रापणं–इत्याह–**तद्गुण इति** ॥ ९८ ॥ अत्र नोच्छेदोऽपित्वन्यथाभावः । **पूर्वरूपता** तूच्छेद इत्याह—

**यदिति** ॥ ९९ ॥ पूर्ववस्तुनो ऽन्यथारूपं तथा स्यात् पुनर्भवति तत्र **पूर्वरूपते**त्यर्थः । **दीपइति** । अत्र नष्टस्योद्योतनः

सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।
विशन्नपि रवेर्मध्यं शीत एव सदा शशी ॥ १०० ॥
प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसंनिधेः ।
कर्णोत्पलानि दधते कटाक्षैरपि नीलताम् ॥ १०१ ॥
अवज्ञा वर्ण्यते वस्तु गुणदोषाक्षमं यदि ।
म्लायन्ति यदि पद्मानि का हानिरमृतद्युतेः ॥ १०२ ॥
प्रश्नोत्तरं क्रमेणोक्तौ स्यूतमुत्तरमुत्तरम् ।
यत्राऽसौ वेतसी पान्थ तत्रासौ सुतरा सरित् ॥१०३॥
पिहितं परवृत्तान्तज्ञातुरन्यस्य चेष्टितम् ।

---

स्य पुनरुद्गमः ।

संसर्गेऽपि परगुणाऽग्रहणे **ऽतद्गुणः** । यथा, चन्द्रस्य सूर्याश्रयेऽपि तापाऽग्रहणे-इत्याह-**सङ्गतेति** ॥ १०० ॥

परसन्निधानात्सिद्धस्य स्वगुणस्योत्कर्षवर्णनेऽ**नुगुणः** । कटाक्षरुचाऽवतंसीकृतानां नीलोत्पलानामिवेत्याह **प्रागिति** ॥ १०१ ॥

यत्राऽस्मिन् सत्यपि नेतरस्य किमपीति वर्ण्यते तत्राऽ**वज्ञा** । यथा चन्द्रोदये सत्यपि कमलम्लानावपि न चन्द्रमसः किमपीत्यत्रेत्याह-**अवज्ञेति** ॥१०२॥ अत्र पद्मम्लान्या चन्द्रे न गुणो न दोषः ।

प्रश्नोत्तरयोर्यत्र क्रमेणोक्तौ उत्तरं निबध्यते तत्रो**त्तरमलङ्कारः** । तेन व्युत्क्रमनिबन्धे नाऽलङ्कार इति प्राप्तम् । यथेयं नदी ह्यसुतरेति पान्थप्रश्ने यत्रेत्यादिरुत्तरमित्याह-**प्रश्नेति** ॥ १०३ ॥ अत्र सङ्केतस्थलमपि तया कथितमिति तस्यापि जिज्ञासायामुत्तरं दत्तम् । अपि च स्यूतमित्यनेन क्रमोक्तौ व्यवधानाभाव उक्त स्तेन व्यवधानेनोक्तौ नोत्तरालङ्कार इति सूचितम । स्यूतमित्युत्तरेण सम्बद्धं यथोदाहृतएवोत्तरद्वयप्रतीताविति **कश्चित्** ।

परवृत्तज्ञानोत्तरं कस्यचिच्चेष्टा **पिहितम्** । यथा नायकस्य नि-

प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत् ॥ १०४ ॥
व्याजोक्तिः शङ्कमानस्य छद्मना वस्तुगोपनम् ।
सखि पश्य गृहारामपरागैरस्मि धूसरा ॥ १०५ ॥
वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तरकल्पनम् ।
मुञ्च मानं दिनं प्राप्तं मन्द नन्दी हरान्तिके ॥ १०६ ॥
स्वभावोक्तिः स्वभावस्य जात्यादिषु च वर्णनम् ।
कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते ॥ १०७ ॥
भाविकं भूतभाव्यर्थसाक्षाद्दर्शनवर्णनम् ।

---

शायामन्यकामिन्यनुरक्तस्य प्रातरागमने तत् ज्ञात्वा कान्तायास्तल्परचनं तत्र तव जागरणं ज्ञातमिदानीं शयनं कुर्वित्यभिप्रायेणेत्याह—**पिहितमिति** ॥ १०४ ॥ नाऽहं त्वच्चरिताऽनभिज्ञेति तथाचेष्टाया आशयः ।

परभीत्या यत्र व्याजेन वास्तवमर्थं गोपयति तत्र **व्याजोक्तिः** । यथा चौर्यरते वृत्तस्य भूधूलिसम्बन्धस्य सखीत्यादिना गोपनम् । ममैते शरीरे परागा इत्युक्त्या धूलिशङ्कानिवारणादित्याह—**व्याजोक्तिरिति** ॥ १०५ ॥

श्लेषमहिम्ना काकुमहिम्ना वा यत्र वाच्यार्थान्तरं कल्प्यते तत्र **वक्रोक्तिः** । यथा—**मुञ्च मानं दिनं प्राप्तमिति** । मानं मुञ्च दिनं प्राप्तमित्यभिप्रायेण कान्तेनोक्ते कान्ता श्लेषेण दिनं प्राप्तं मा मुञ्चेत्यर्थं कल्पयित्वा प्राह हे मन्द मम न नन्दिनः प्राप्तिः, क्व पुनः ? स हरान्तिके इत्याह— **वक्रोक्तिरिति** ॥ १०६ ॥ एवं काक्वापि द्रष्टव्यम् ।

स्वभावो यत्राऽश्वादेर्वर्ण्यते तत्र **स्वभावोक्तिः** । यथा **कुरङ्गैरि**त्यादौ मृगस्वभाववर्णनमित्याह—**स्वभावेति** ॥ १०७ ॥

यत्र भूतस्य भाविनो वाऽर्थस्य साक्षात्कारो वर्ण्यते तत्र **भावि-**

अलं विलोकयाद्यापि युध्यन्तेऽत्र सुरासुराः ॥ १०८ ॥
देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः ।
त्वं वसन् हृदये तस्याः साक्षात्पश्चेपुरीक्ष्यसे ॥ १०९ ॥
उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम् ।
सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः ॥ ११० ॥
अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः ॥ १११ ॥
रसभावतदाभासभावशान्तिनिबन्धनाः ।
रसवत्प्रेयऊर्जस्विसमाहितमयाभिधाः ॥ ११२ ॥
भावानामुदयः सन्धिः शबलत्वमिति त्रयः ।
अलङ्कारानिमान्सप्त केचिदाहुर्मनीषिणः ॥ ११३ ॥

---

**कम्** । यथा भीषणतोपवर्णनायाऽतीतयुद्धप्रेक्षणवर्णनमित्याह—**भाविकमिति** ॥ १०८ ॥

यत्र देशविप्रकृष्टस्याऽऽत्मविप्रकृष्टस्य च साक्षात्कारो वर्ण्यते तत्र **भाविकच्छविः** । यथा विप्रकृष्टां नायिकामुद्दिश्य नायकं प्रति दूतीवचनम्—**त्वं वसन्नि**त्यादीत्याह—**देशेति** ॥ १०९ ॥

सम्पदत्युक्तिरु**दात्तम्** । अन्यस्योपलक्षणं श्लाघ्यं चरितं चोदात्तम् । यथा रुद्रपार्थयोर्युद्धं सानुमतः कस्यचिदुपलक्षणमित्याह—**उदात्तमिति** ॥ ११० ॥

अद्भुतस्य सामर्थ्यस्य शौर्यादेर्वर्णनम**त्युक्तिः** । यथा कल्पशाखिनोऽपि त्वां याचन्ते इति दीनाऽत्युक्तिरित्याह—**अत्युक्तिरिति** ॥ १११ ॥

रसादिवर्णने चत्वारो रसवदादयोऽलङ्काराः । भावोदयादिवर्णने च त्रय इति पूर्वोक्तव्यतिरिक्ताः सप्ताऽलङ्काराः सन्तीति केषांचिन्मतमाह **रसेति** ॥ ११२ ॥ ११३ ॥

शुद्धिरेकप्रधानत्वं तथा संसृष्टिसंकरौ ।
एतेषामेव विन्यासान्नालङ्कारान्तराण्यमी ॥ ११४ ॥
सर्वेषां च प्रतिद्वन्द्वप्रतिच्छन्दभिदाभृताम् ।

---

यत्रैक एवाऽलङ्कारस्तत्र शुद्धिः एकप्रधानता । यत्र द्वयोरलङ्कारयोः सतोरेकस्य प्राधान्यं तिलतण्डुलन्यायेन स्फुटाऽनेकाऽलङ्कारता संसृष्टिः । नीरक्षीरन्यायेनाऽस्फुटाऽनेकालङ्कारता सङ्करः । एवमेते चत्वारो ऽन्ये लङ्कारा इति, तन्न । एते हि पूर्वोक्तानामेवाऽलङ्काराणां विन्यासा न त्वलङ्कारान्तरमित्याह—**शुद्धिरिति** ॥ ११४ ॥

क्वचिदेकस्यैव विन्यासः क्वचिदन्यस्येति विन्यासभेदमात्रं न त्वलङ्कारान्तरम् । अन्यथा रसानामपि विन्यासभेदे रसान्तरापत्तिरिति भावः । अपि च सर्वेषामलङ्काराणां प्रतिद्वन्द्वप्रतिच्छन्दरूपाणि विसदृशसदृशरूपाण्यलङ्कारान्तराण्यप्यूहनीयानि । अधिकविसदृशं न्यूनं यथा—

यन्मध्यदेशादपि ते सूक्ष्मं लोलाक्षि लक्ष्यते ।
मृणालसूत्रमपि ते न संमाति स्तनान्तरे ।

इत्यत्र एतदाधिकं विसदृशं तत्र महत्त्वस्य न चाऽणुत्वस्य वर्णनात् ।

मधुव्रतौघः कुपितः स्वकीयमधुप्रपापद्मनिमीलनेन ॥
बिम्बं समाक्रम्य बलात्सुधांशोः कलङ्कमङ्के स्फुटमातनोति ॥

एतत्प्रत्यनीकसदृशम्, न तु तदेव तत्र शत्रुसम्बन्धिनः प्रतिकूलाचरणवर्णनात् अत्र शत्रोरिव तत्कथनात् । अपि चैकोऽलङ्कारः प्रकारसम्भवादन्यत्राऽप्यूह्यः । यथा पृथक् साधर्म्यकथनेन दृश्यसादृश्यरूपत्वं रूपकइवोपमायामपि । उदाहरणम्—

हनुमानिव दीपोऽयं दूरमुल्लासिताञ्जनः ।
किञ्च राम इवाभाति विनिर्दग्धदशाननः ॥

एषां केषांचित्पूर्णोपमा । एतैस्तु पूर्णोपमाया लक्षणान्तरमुक्तम् । प्राचीनानां मते पृथक् साधर्म्यहीना लुप्तोपमा । तत्र पूर्वार्द्धेन प्रतिद्व-

उपाधिः क्वचिदुद्भिन्नः स्यादन्यत्रापि संभवात् ॥११५॥
माला परंपरा चैषां भूयसामनुकूलके ।
मनुष्ये भवतः क्वापि ह्यलङ्काराङ्गतां गते ॥ ११६ ॥
शब्दे पदार्थे वाक्यार्थे वाक्यार्थस्तबके तथा ।
एते भवन्ति विन्यासाः स्वभावातिशयात्मकाः ॥११७॥
कस्याप्यतिशयस्योक्तेरित्यन्वर्थविचारणात् ।
प्रायेणामी ह्यलंकारा भिन्ना नातिशयोक्तितः ॥ ११८ ॥
अलंकारप्रधानेषु द्र्यानेष्वपि साम्यताम् ।
वैलक्षण्यं प्रतिव्यक्ति प्रतिभाति मुखेष्विव ॥ ११९ ॥

---

न्द्वादि । द्वितीयार्द्धेनैकालङ्कारप्रकारो ऽलङ्कारान्तरे ऽस्तीत्याह—**सर्वेषां चेति** ॥ ११५ ॥

उपाधिः प्रकार उद्भिन्नः कथितः । अन्यत्राऽपि सम्भवतो योजनाय एतेषामनुप्रासादीनां शब्दालङ्काराणामाश्रयविशेषजिज्ञासाशालिनः प्रति इत्यर्थः। तत्राऽलङ्कारेषु अनुप्रासादयः शब्दे रूपकादयः पदार्थे उपमादयः वाक्यार्थे दृष्टान्तादयः वाक्यार्थस्तबके इत्याह **शब्देति** ॥ ११७ ॥ तत्र रूपकादयो विन्यासात्मका अतिशयोक्तिप्रभृतयो ऽतिशयात्मकाः स्वभावोक्तिप्रभृतयः स्वभावात्मका इत्याह—**एत इति** । के च-नाऽतिशयस्योक्तिरति नियोगपुरस्कारेणाऽलङ्कारमात्रमातिशयोक्तिरूपमादायाऽतिशयकथनादित्याह—**कस्यापीति** ॥ ११८ ॥ एतद्दर्शयति-**अलङ्कारेति** ॥ अतिशयोक्तित्वेन वास्तवेष्वपि उपमादिषु प्रातिस्विकवैलक्षण्यमस्त्येव मुखत्वेन समानामिव मुखानामित्याशयः । साम्यतां समतां छन्दोनुरोधात्तथा । यदि कथंचित्साम्ये भेदपुरस्कारेण नोपमादिनाऽऽम्नायः कथनं तदा कुण्डलकटकादयो भेदा नोरीकार्याः स्युः, तत्रापि यथाकथंचित्साधर्म्यसत्त्वादित्याह-**अलङ्कारेति**॥११९॥ तथ्येषु कुण्डलादिषु अर्वाचीना उपमादयः । कुण्डलादिच्छाययैवाऽत्रा

अलंकारेषु तथ्येषु यद्यनास्था मनीषिणाम् ।
तदर्वाचीनभेदेषु नाम्नां नाम्नाय इष्यताम् ॥ १२० ॥
महादेवः स० । चतुर्थः सैकोयम् ॥ १२१ ॥

इति चन्द्रालोके पञ्चमो मयूखः ।

---

ऽङ्कारपदप्रयोगात् । यद्वा ननूपमादितो ग्रन्थान्तरासिद्धाङ्कवता ऽन्येऽप्यलङ्कारतया निरुक्तास्तत्र किं बीजमतआह-**अलङ्कारेष्विति** १२० तथ्याऽर्वाचीनयोः पूर्वग्रन्थलिखिततद्ग्रन्थमात्रलिखितयोरलङ्कारताप्रयोजकरूपसाम्ये यदि तथ्ये नाऽलङ्कारपदप्रयोगस्तदा ऽर्वाचीनेऽपि मास्तु न वेत्येवमित्याशयः ।

श्रीवीरभद्रभूपतिलब्धानिदेशप्रभावेण ।
**चन्द्रालोकमयूखः** पञ्चम इह सप्रपञ्चो ऽभूत् ॥

॥ इति **शारदागमे** पञ्चमो मयूखः ॥ ५ ॥

## षष्ठो मयूखः ।

### अथ रसाः ।

आलम्बनोद्दीपनात्मा विभावः कारणं द्विधा ।
कार्योऽनुभावो भावश्च सहायो व्यभिचार्यपि ॥ १ ॥
गलद्वेद्यान्तरोद्भेदो हृदयेष्वजडात्मनाम् ।
मिलन्मलयजालेप इवाह्लादं विकासयन् ॥ २ ॥
काव्ये नाट्ये च कार्ये च विभावाद्यैर्विभावितः ।
आस्वाद्यमानैकतनुः स्थायी भावो रसः स्मृतः ॥३॥
रत्याख्यस्थायिभावात्मा वल्लभादिविभावितः ।

---

बलिसम्पदोऽन्तरायं देवनिकायस्तुतं सततम् ।
वयमिह विघ्नविहत्यै प्रणताः स्थलवामनं मनसा ॥

अथ रसाऽनुगुणतया विभावादि कथयति—**आलम्बनेति** ॥१॥ कारणं विभावः । स द्विधा आलम्बनोद्दीपनभेदात् । तत्र शृङ्गारे आलम्बनं कान्ता कान्तश्च । उद्यानादिरुद्दीपनम् । एवमन्यत्रापि । अनुभावः कार्यः स च शृङ्गारभ्रूक्षेपस्मितादिः । भावः सहायः सहकारी स एव व्यभिचारिपदेनाऽप्युच्यत इत्यर्थः । व्यभिचारिणां भावत्वेन व्यवहारो ग्रन्थान्तरे नास्तीति चेन्न । व्याभितो व्यभिचारी भाव इति **काव्यप्रकाश**एवाऽभिधानात् ।

रसस्वरूपमाह—स्थायी भाव एव रत्यादिरसः । ननु तस्य सूक्ष्मरूपस्य सर्वदा सत्त्वात्सर्वदा रसव्यवहारापत्तिरत आह—**विभावित इति** । अभिव्यक्त इत्यर्थः । अभिव्यक्तिकारणमाह—**विभावाद्यैरिति** । अभिव्यक्तिस्थलमाह—**काव्यइति** ॥ २ ॥ ३ ॥

काव्यनाटकयोः श्रवणेन रसः प्रतीयते विभावादिप्रत्ययद्वारा कार्यपदेन चाऽत्र नाटकाऽनुबद्धं नृत्यं गृह्यते तत्प्रेक्षणे रसप्रतीतेरित्यर्थः ।

आलस्येर्ष्याजुगुप्साभ्यो विना संचारिभिर्युतः ॥४॥
अनुभावैः कटाक्षाद्यैरुन्मादाद्यैर्यथाक्रमम् ।
संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ॥ ५ ॥
हासस्थायी रसो हास्यो विभावाद्यैर्यथाक्रमम् ।
वैरूप्यफुल्लगण्डत्वावहित्थाद्यैः समन्वितः ॥ ६ ॥

---

नन्वभिव्यक्तिनाशदशायामपि रसव्यवहारापत्तिरभिव्यक्तत्वस्य पूर्वसत्त्वादतआह--**आस्वाद्यमानैकतनुरिति** । आस्वाद्यमानमेव तस्य स्वरूपं न त्वास्वादितमास्वादनीयं चेति यावज्ज्ञानं तावदेव रसत्वमिति भावः । ननु दुःखात्मककरुणादौ प्रवृत्तिर्न स्यादत आह-**आह्लादं विकासयन्निति** । तत्राऽद्भुतविभावादिप्रेक्षणेन सुखाभिव्यक्तिरेव भवतीत्यर्थः । ननु विभावादिना ऽन्याभिव्यक्तौ भासमानस्य रसत्वं तत्र दैववशादन्यस्याऽपि भाने तस्याऽपि रसत्वं स्यादत आह-**गलादिति** । अन्यत्र न भासत एवेत्यर्थः । क इवाऽऽह्लादं विकासयन्, जडात्मनां हृदयेषु मिलन्मलयजालेप इव । जडात्मत्वं विशेषः किमितीति चेन्न । हृदयेष्वजडात्मनामिति पाठस्यात्मसम्मतत्वात्तस्य च दार्ष्टान्तिकएवान्वयोपगमात् । अजडात्मत्वं च तत्तद्रसपरिशीलनेऽभ्यासस्या पाटवमतएव शान्ताभ्यासिनां न शृङ्गाराभिव्यक्तिः । विस्तृतमेतदस्माभिर्ग्रन्थान्तरेषु तत्तत्रैवानुसन्धेयम् ।

शृङ्गारमाह-**रतीति** ॥ ४ ॥ ५ ॥ रत्याख्यः स्थायी भावो यस्येदृश आत्मा यस्य । स शृङ्गारः द्विविधः । सम्भोगादिभेदेन । तत्राऽऽलम्बनविभावः कान्ता कान्तश्च । उद्दीपनविभाव उद्यानादिः । अनुभावः कटाक्षादिः । उन्मादादिर्व्यभिचारी । आदिपदग्राह्याऽऽलस्यादिभिन्ना इत्यर्थः । सम्भोगोदाहरणं **ममैव**—

गुरुसविधे राधाया माधववदनाभिलाषिणी नयने ।
पञ्जरचङ्क्रममाणं खञ्जनमिथुनं तिरस्कुरुतः ॥

अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात् ।
विभावाद्यैर्यतः शोकस्थायी स्यात् करुणो रसः ॥ ७ ॥
क्रोधस्थायी रसो रौद्रो विभावाद्यैः समन्वितः ।
मात्सर्यहस्तनिष्पेषसंमोहाद्यैर्यथाक्रमम् ॥ ८ ॥
उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः ।

---

विप्रलम्भोदाहरणं **ममैव**—

विस्मितस्मितमुखी निरीहताशालिदृक् परमखिन्नमानसा ।
शालिदृक् परमखिन्नमानसा त्वां विना यदुपते ऽवसीदति ॥

हास्यमाह-**हासेति** ॥ ६ ॥ हासः स्थायी यस्येदृशो रसो हास्यः। तत्र विभावः कौरूप्यादिः । अनुभाव उत्फुल्लगण्डत्वादिः । व्यभिचारी अवहित्थादिरित्यर्थः । उदाहरणं **ममैव**—

पृच्छा किं कुरुते गतः स मथुरामित्याकलय्योद्धवा-
दन्तर्हासतया क्षणार्द्धमपि न स्थातुं क्षमा यौवनात् ।
विस्फूर्जत्करतालिकापटुरवं प्रोत्फुल्लगण्डस्थलं
निःशङ्कं कथयन्ति गोपसुदृशः कुब्जारतिं श्रीपतेः ॥

यस्य शोकः स्थायी भावः स **करुणो** रसः । तस्याऽभीष्टविसं-योगादिर्विभावः । अश्रुपातादयोऽनुभावाः । ग्लान्यादिर्व्यभिचारीत्याह-**अभीष्टेति** ॥ ७ ॥ उदाहरणं **ममैव**—

रणभुवि दशकण्ठकण्ठकाण्डे दशरथनन्दनसायकेन नूनम् ।
हृदि मयदुहितुर्दृगम्बुसिक्ते करुणतरुस्तरुणो बभूव भूयः ॥

यस्य क्रोधः स्थायी । मात्सर्यादिर्विभावः । हस्तनिष्पेषादिरनुभावः । संमोहादिर्व्यभिचारी । **स रौद्र** इत्याह—**क्रोधेति** ॥ ८ ॥ उदाहरणं **ममैव**—

आगर्भमावृद्धममर्षशीलः स्मरन्पितुः क्षत्रकृतापराधम् ।
परश्वधेनैष भृगुप्रवीरः प्राणैर्वियोज्याऽपि रिपूंश्छिनत्ति ॥

वीरोऽनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः ॥ ९ ॥
व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभावभृत् ।
भावैर्मोहादिभिर्युक्तो भयस्थायी भयानकः ॥ १० ॥
स्थायी जुगुप्सा बीभत्सो विभावाद्यैर्यथाक्रमम् ।
अनिष्टेक्षणनिष्ठीवमोहाद्याः संमताः क्रमात् ॥ ११ ॥
अद्भुतो विस्मयस्थायी मायादिकविभावभूः ।
रोमाञ्चाद्यनुभावोऽयं स्तम्भादिर्व्यभिचारिकः ॥ १२ ॥

---

यत्रोत्साहः स्थायी । प्रभावादिर्विभावः । स्थैर्यादिरनुभावः । गर्वादिर्व्यभिचारी । स **वीर** इत्याह—**उत्साहेति** ॥ ९ ॥ **ममैवो**दाहरणम्—

आचार्यौ द्वाविहैतौ शरकलशभवौ द्रोणभूस्तत्समानो
भीष्मस्तातस्य तातो धनुषि न सदृशाः कर्णदुर्योधनाद्याः ।
इत्थं हन्तव्यचिन्ताकुलहृदयतया कौरवाणां पुरस्ता-
दीषद्दोःस्तम्भशाली जगति विजयते पाण्डवः खाण्डवारिः ॥

यत्र भयं स्थायि । व्याघ्रादिर्विभावः । वेपितादिरनुभावः । मोहादिर्व्यभिचारी । स **भयानक** इत्याह—**व्याघ्रेति** ॥ १० ॥ **मम**—

दृष्ट्वा गरुत्मति समुद्धृतपारिजातमभ्युद्यतास्त्रमजितं न जितं परेण ।
देवाधिपस्य परिमीलितनेत्रमालमैरावणो वपुषि वेपथुराविरासीत् ॥

यत्र स्थायी जुगप्सा । अनिष्टेक्षणादिर्विभावः । निष्ठीवनादिरनुभावः । मोहाद्या व्यभिचारिणः । स **बीभत्सरस** इत्याह-**स्थायी**ति ॥ ११ ॥ **मम**—

कुशान् शिरोभिः करयोर्विधाय श्यामांस्तिलान् खण्डितकालदण्डैः ।
स्याने रिपूणां रुधिरैस्तनोति तृप्तिं पितॄणां भृगुवंशवीरः ॥

यत्र स्थायी भावो विस्मयाख्यः । मायादिर्विभावः । रोमाञ्चादिरनुभावः । स्तम्भादिर्व्यभिचारी । सोऽद्भुत इत्याह—**अद्भुत**

निर्वेदस्थायिकः शान्तः सत्सङ्गादिविभावभूः ।
क्षमादिकानुभावोऽयं स्तम्भादिव्यभिचारिकः ॥ १३ ॥
रतिर्देवादिविषया सन्ति च व्यभिचारिणः ।
वेद्यमाना निगद्यन्ते भावाः साहित्यवेदिभिः ॥ १४ ॥
निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।

---

इति ॥ १२ ॥ मम—

चित्रमत्र चरितं मनोभुवो गोपिकाः शृणुत वृत्तचेतसः ।
श्रीपतिः परमशोभनाकृतिः कुब्जया चिरतरं वशीकृतः ॥

यत्र निर्वेदः स्थायी । सत्सङ्गादिर्विभावः । क्षमादिरनुभावः । स्तम्भादिर्व्यभिचारी । स **शान्त** इत्याह—**निर्वेदेति** ॥ १३ ॥

मित्रे शत्रावुदासीने तथा काञ्चनकाचयोः ।
कदाचिच्चेतसो वृत्तिः समा मम भविष्यति ॥

देवादिविषया रतिः सा भावः । अपि च ये व्यभिचारिणः सन्ति विद्यमानास्ते वेद्यमाना व्यङ्ग्या भावः । अविद्यमानस्य भावशान्त्यादौ गणनादित्याह—**रतिरिति** ॥ १४ ॥ देवविषया यथा **मम**—

इयदेव देव वयमर्थयामहे सुकृतैः कृतैरपि च पूर्वजन्मभिः ।
गरुडाधिरूढमवलम्ब्य मामकी ननु चित्तवृत्तिरपपापमेधताम् ॥

गुरुविषया ऽनुमानखण्डपरीक्षायां **मम**—

युक्तिश्रेणीतिमिविषमतापूर्वपक्षोभ्रनक्र-
स्फूर्जत्पत्रस्फुटविकटतातुङ्गविस्तारभाजि ।
न्यायाम्भोधौ यदिह बहुधा मादृशां बोधसम्प-
द्बीजं तस्याः प्रथितमतिदा पैतृकी भक्तिरेव ॥

**ममैव**—

यावत्प्रस्थानढक्काध्वनिकलितादिशं धावदश्वाग्र्यवेग-
च्छिन्नत्याचक्रधू(?)भरभरितनभोमण्डलं तत्र यामि ॥

आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥१५॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ १६ ॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ १७ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदिमे भावाः समाख्यातास्तु नामतः ॥ १८ ॥
सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया ।
अनौचित्या रसाभासा भावाभासाश्च कीर्तिताः ॥१९॥
भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।
काव्यस्य काञ्चनस्येव कुङ्कुमं कान्तिसंपदे ॥ २० ॥

---

तावज्ज्ञाताऽभिसन्धिर्जवविजितमहावातचेतःप्रचार-
श्चारो दुष्टो ऽरिवर्गं विषमगिरिदरीगह्वरान्तर्निनाय ॥

रसाभासा भावाभासाश्चानौचित्या भवन्ति । अनौचिती च सर्वसाधारणं प्रेम प्रश्रयश्च तथाविध इत्यादि रूपेति दर्शयति-**सर्वेति**॥१९॥

वातान्दोलितनीलनीरजवनीलावण्यपाटच्चरै-
रुल्लासः स्वदृशोः कृशोदरि मुहुः के भावनीयास्त्वया ।
सौभाग्यैकजुषो द्विषो निजवपुःकान्त्या मनोजन्मनः
सम्भाष्याः कति वा स्मितामृतरसासिक्तै गिरां गौरवैः ॥

अत्र एकस्या अनेककामुकविषयोऽभिलाषो वर्णयितुमनुचित उपनिबद्धः ।

स्मरन्तु त्वामन्तः स्मरहरसमप्रश्रयममी
परैर्देवैर्लोकाः कति च न न ते हानिरियता ।
यतो वेदव्यासप्रभृतिनिखिलार्थैकविदुषां
स्तुतौ वा तत्त्वे वा दरमसविशेषास्त्वयि गिरः ॥

आ तुर्यमा सप्तमं च यथेष्टैरष्टमादिभिः ।
समासः स्यात्पदैर्न स्यात्समासः सर्वथापि च ॥ २१ ॥
पाञ्चालिकी च लाटीया गाडीया च यथारसम् ।
वैदर्भी च यथासंख्यं चतस्रो रीतयः स्मृताः ॥ २२ ॥

---

अत्र महारुद्रे सर्वसाधारणः प्रश्रयोऽनुचित उपनिबद्धः पामराणाम् ।

शान्त्यादीनाह--**भावस्येति** ॥ २० ॥

**मम**-पार्वत्याः क्षालितावङ्घ्री स्खलन्त्या मौलिगङ्गया ।
नते शम्भावशोणे तु जाते नयनपङ्कजे ॥

अत्र कोपस्य शान्तिः ।

द्वारे निकुञ्जभवनस्य विलोक्य विद्यु-
दुद्योतमाहृतमनास्तदनागमेन ।
कान्तिप्रमुष्टतिमिरामवधाय राधां
निन्ये ऽपवर्त्मनि दृशं मथुराधिनाथः ॥

अत्रौत्सुक्यस्योदयः ।

विलम्ब्य कस्यांचिदुपागतोय-
मतः परावर्तितदृष्टिसृष्टिः ।
प्रवर्त्तिताक्षी स्मृतवक्रलक्ष्मी
राधा हरौ लोकगुरौ बभूव ॥

अत्र कोपौत्सुक्ययोः सन्धिः ।

नद्यः कुत्र पराः क्व दैवतसरिद् द्रक्ष्यामि भूयोऽपि तां
तत्स्नानाद्बहुसम्पदो जलतया दृष्टाऽपि हर्षप्रदा ।
स्थास्ये तद्विरहातुरः कियदहं जातैव सा दुर्लभा
चेतः स्वास्थ्यमुपेहि केन वपुषा हा दृक्पथं यास्यति ॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ।
द्वयोः समावेश सन्धिः बहूनां शबलतेति मत इदमुदाहरणम् । पूर्वोपम-

मधुरायां समाक्रान्ता वर्गस्थाः पञ्चमैर्निजैः ।
लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ ॥ २३ ॥
रेफाक्रान्ता वर्ग्ययणाष्टवर्गात्पञ्चमादृते ।
कपाक्रान्तस्तवर्गः स्यात्प्रौढायां च कमूर्धता ॥ २४ ॥
सर्वैरूर्ध्वैः सकारस्य सर्वं रेफस्य सर्वथा ।
रहोर्द्वेधा तु संयोगः परुषायां शषौ स्वतः ॥ २५ ॥
लकारोऽन्यैरसंयुक्तो लघवो घमधा रसौ ।
ललितायां तथा शेषा भद्रायामिति वृत्तयः ॥ २६ ॥

---

र्देनापरप्रवृत्तौ तु तथात्वे क्वाकार्यमित्याद्युदाहरणम् ।

द्वित्रिचतुरैः पदैः समासे पाञ्चाली । पञ्चषट्सप्तपदा लाटीया । अष्टमादिभिर्गौडीया। सर्वथा समासाभावे वैदर्भी रीतिराह--**आतुर्यमिति** ॥ २१ ॥ २२ ॥ यस्मिन् न्यासे या रीतिरनुकूला सा तत्र कार्या । यथा शृङ्गारे वैदर्भी रौद्रे गौडीयेति भावः ।

अथ वृत्तीराह--**मधुरायामिति** ॥ २३ ॥ निजैः पञ्चमैर्वर्गस्थाः समाक्रान्ताः निजपञ्चयुक्तशिरसः कवर्गाद्याः लकारेण संयुक्तश्च लकाररणौ च ह्रस्वव्यवहितौ मधुरायामित्यर्थः । **रेफेति** ॥ २४ ॥ ककारादौ वर्गा रेफाक्रान्ता यकारणकारौ च । तत्र वर्गेषु तवर्गपञ्चमश्च स्वरःककारादिर्न रेफाक्रान्तः टवर्गस्य वरणकारवर्गस्य निषेधः(?) । णकारस्योपादेयत्वेनोपादानात् । तवर्गः ककारेण पकारेण वा ऽऽक्रान्तस्तदधोवर्त्ती तकारश्च ककारस्य मूर्धनि प्रौढायामित्यर्थः । **सर्वैरिति** ॥ २५ ॥ मकारस्योपरि ककारादयः सर्वे सर्वेषामुपर्यधश्च रेफः हकारो रेफेणोभयत्रैकत्र च संयुक्तः शकारषकारौ स्वतः केवलाः संयुक्तौ च । ग्रन्थान्तरात्परुषायामित्यर्थः । **लकार इति** ॥ २६ ॥ अन्यैरित्यनेन लकारस्य लकारसंयोगेऽपि न दोषः । घकारभकारधकाररेफसकारा लघवो ललितायामित्यर्थः । शेषाः षकारादयो वृत्यन्तरेऽनुपयुक्ताः पृथ-

अङ्गभङ्गोल्लसल्लीला तरुणी स्मरतोरणम् ।
तर्ककर्कशपूर्णोक्तिग्राम्योत्कटधियां वृथा ॥ २७ ॥
वीप्सोत्सर्पन्मुखाग्रार्द्रं बर्ही जह्ने कुशस्तृपम् ।
ललना रभसं धत्ते घनाटोपे महीयसि ॥ २८ ॥
महादेवः० ॥ ऋतुसंख्यः० ॥ २९ ॥

॥ इति चन्द्रालोके षष्ठो मयूखः ॥

---

गथवा अन्यसंयुक्ता भद्रायामित्याह---शेषा इति । एवं चाऽक्षर-विशेषविन्यासनिबन्धना वृत्तय इत्यर्थः । उदाहरणम्–अङ्गेति ॥२७॥ तर्ककर्कशधिया स्मरतोरणं तरुणी नन्दाय साहित्यपरिशीलनसरसाना-मेवोपयुज्यत इत्यर्थः । वीप्सेति ॥ २८ ॥ वीप्सया वारंवारं उत्स-र्पन् यन्मुखाग्रं तदार्द्रं यथा स्यात्तथा घनागमेन मयूरस्तृपं जह्ने ललना रभसं धत्ते इत्यर्थः । तोरणमित्यन्तं मधुरा वृथेत्यन्तं प्रौढा तृपमि-त्यन्तं परुषा घनेत्यन्तं ललिता शिष्टं भद्रा ॥

श्रीवीरभद्रभूपतिलब्धनिदेशात्मतत्त्वेन ।
चन्द्रालोकमयूखः षष्ठः स्पष्टार्थतां नीतः ॥ ६ ॥

इति **शारदागमे** षष्ठोः मयूखः ॥ ६ ॥

## सप्तमो मयूखः ।

वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी ।
भारती भाति गम्भीरा कुटिला सरला क्वचित् ॥ १ ॥
सांमुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः ।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः ॥ २ ॥
अविवक्षितवाच्यस्य द्वौ भेदौ वाच्यमेव चेत् ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ॥ ३ ॥

---

राजन्यकूटकाननदावानलपाथसां राशिः ॥
परशुपरासुप्रतिभटपृतनागीतो हरिर्जयति ॥ १ ॥

इदानीं व्यञ्जनाद्यास्त्रिविधा वृत्तीराह- **वृत्तीति** ॥ १ ॥ व्यञ्जनालक्षणाशक्तिरूपैर्युक्ता भारती क्रमेण गम्भीरादिसंज्ञां लभते इत्यर्थः । जान्हव्यास्त्रिपथगात्वं प्रसिद्धमेव ।

व्यञ्जनामाह- **सांमुख्यमिति** ॥ २ ॥ यथा लोलाक्षी क्वचन सांमुख्यं विदधाति कमपि कटाक्षेण कृतार्थीकरोति, तथा स्फुटमर्थान्तरे सांमुख्यं विदधानाया गिरः शक्त्यादिवशेनार्थान्तरं प्रतिपादयन्त्या अर्थान्तरे शक्त्यादिभिन्नो व्यापारो व्यञ्जनेत्यर्थः । कटाक्षसाम्येन संमुखावलोकनादिव कटाक्षस्य शक्त्यादितो व्यञ्जनायाः सौभाग्यमुक्तम् । तत्र लक्षणामूलव्यङ्ग्यस्य द्वौ भेदौ । एवं वाच्यस्यानुपयुज्यमानतयाऽर्थान्तररूपेण परिणामेऽपरमनुपपद्यमानतया तिरस्कारे तत्रायम् । मयेदमुच्यते त्वं सावधानतया तिष्ठेत्यत्र आह उच्यत इति कथनमनुपयुक्तं, तत्कृतककथनस्य तन्मुखाद्वचननिःसरणादेव प्रतीतिरित्युपदिश्यते इति लक्ष्ये परिणतं सामान्यविशेषभावश्च सम्बन्धः स्वस्यासत्वं चेह व्यङ्ग्यम् । द्वितीये स्वपकारिण्युपकारः, त्वमित्यत्राऽपकारित्वं बाधितं विरोधसम्बन्धेनाऽपकारं लक्षयति । मम त्वं मनुष्याऽग्रे

द्वौ विवक्षितवाच्यस्य लक्ष्यालक्ष्यक्रमात्मकौ ।
चत्वारिंशद्युतैकेन भेदाः षट् चानयोः क्रमात् ॥ ४ ॥
त्रिधा शब्दार्थतद्युग्मशक्तिजन्मा स्फुटक्रमात् ।
रसभावतदाभासप्रमुखस्त्वस्फुटक्रमात् ॥ ५ ॥
वस्त्वलङ्कारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ ।
अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा ॥ ६ ॥

---

तेन शब्देनाऽभिधीयस इति स्वस्य साधुत्वं व्यङ्ग्यमित्यभिप्रेत्याह—**अविवक्षितेति** ॥ ३ ॥

लक्षणस्थले वाच्यस्याऽविवक्षा भवति तादृशि व्यञ्जनावति काव्ये द्वौ भेदौ वाच्यस्य द्वैविध्यादित्यर्थः । यत्र वाच्याविवक्षा भवति स व्यञ्जको विवक्षितवाच्यः, शक्तः सन् व्यञ्जक इति यावत् । स द्विविधः । यत्र व्यञ्जकव्यङ्ग्ययोः क्रमः प्रतीयते स एकः यत्र न प्रतीयते स द्वितीय इत्याह—**द्वाविति** ॥ ४ ॥

तत्राऽऽद्यस्यैकचत्वारिंशद्भेदाः । द्वितीयस्य तु षडित्याह—**चत्वारिंशादिति** । लक्षणमूलयोस्तु पदवाक्यगामितया प्रत्येकद्वित्वे चातुर्विध्ये सर्वसङ्कलने एकपञ्चाशद्भेदा इत्यर्थः । तत्र शब्दशक्त्युद्भवेऽर्थशक्त्युद्भव उभयशक्त्युद्भवश्चेति भेदाल्लक्ष्यक्रमस्त्रिविध इत्याह—**त्रिधेति** ॥ ५ ॥ स्फुटः क्रमः लक्ष्यक्रमः यत्र शब्दः परिवृत्त्यसहः स शब्दशक्तिजः । यत्र परिवृत्तिसहः सोऽर्थशक्तिजः । यत्र कश्चित्परिवृत्तिसहः कश्चिन्न स उभयशक्तिज इत्यर्थः । यत्र रसादिर्व्यङ्ग्यः सोऽस्फुटक्रमः । तत्र विभावादेर्व्यञ्जकस्य व्यङ्ग्यस्य च रसादेर्विद्यमानस्य क्रमस्य कालसान्निकर्षेण प्रतीतेः । एवं च सोऽलक्ष्यक्रमत्वेनैक एवेत्याह—**रसेति** । प्रमुखशब्देन शबलतान्ता गृह्यन्ते ।

शब्दशक्तिजन्मा द्विविधः । वस्तुना व्यक्त्यैको ऽलङ्कारश्च द्वितीय इत्याह—**शब्देति** ॥ ६ ॥ “शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि

चत्वारो वस्त्वलङ्कारमलङ्कारस्तु वस्तु यत् ।
अलङ्कारमलङ्कारो वस्तु वस्तु व्यनक्ति तत् ॥ ७ ॥
वक्तुः कविनिबद्धस्य कवेर्वा प्रौढिनिर्मितः ।
स्वसिद्धो वा व्यञ्जकोऽर्थश्चत्वारस्त्रिगुणास्ततः ॥ ८ ॥
शब्दार्थोभयभूरेकः स च वाक्यैकसंश्रयः ।
पदैकदेशे रचनावर्णवाच्यपदेष्वपि ॥ ९ ॥

---

नरेन्द्र यस्मै त्वम्" इत्यत्र विरुद्धावपि त्वदनुवर्तिनौ भवत इत्यत्र व्यङ्ग्यं शब्दशक्तिमूलम् । शब्दान्तरेण तयोरुपादानेऽप्रतीतेः ।

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥

इत्यत्र व्यतिरेकालङ्कारः । अत्रापि शब्दशक्तिश्चित्रादिशब्दप्रयोगं विनाऽप्रतीतेः । अर्थशक्तिजो द्वादशविध इत्याह—**अर्थेति** । विशदयति -**तद्यथेति** । व्यञ्जकस्य प्रथमतश्चत्वारो भेदाः । अलङ्कारव्यञ्जकं वस्तु । वस्तुव्यञ्जकोऽलङ्कारः । अलङ्कारव्यञ्जकोऽलङ्कारः । व्यञ्जकं वस्तु इति भेदात् । एते च त्रिगुणाः कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नाश्चत्वारः स्वसिद्धाश्चत्वार इति भेदात । एवं च द्वादशभेदा इत्याह—**चत्वार इति** ॥ ७ ॥ ८ ॥ यद्यस्मात् । उदाहरणानि—

नतेऽपि हि कथाशीला स्ता धन्या व्रजसुभ्रुवः ।
अहं त्वाभिमुखे कृष्णे स्मरशास्त्रेऽप्यसंस्मृतिः ॥

वस्तुनाऽत्र स्वस्य धन्यत्वं व्यङ्ग्यम् । अतिशायितस्मरशरवशत्वात् । वस्तुपदेन चाऽत्राऽलङ्कारातिरिक्तं गृह्यते । अत्र कवे र्वक्तुर्वा प्रौढोक्त्या सिद्धः, किं तु प्रौढोक्तिमन्तरेण घटमानत्वं ब्रह्मसृष्टिसिद्धत्वमिति यावत् । इदमेव स्वसिद्धत्वम् ।

श्रीहरेर्भुजयोरन्तश्चाणूरस्य पतिष्यतः ।
प्रागेव प्रस्थितो वीररसः पीडनशङ्कया ।

**प्रबन्धे चेति षोढाऽसौ रसाद्याख्योऽस्फुटक्रमः ।**
**एषु सप्तदशस्वेकं परित्यज्यास्फुटक्रमम् ॥ १० ॥**

---

अत्रोत्प्रेक्षया मुखवैवर्ण्यादिरूपं वस्तु ।
नलिनासनस्य धातुर्वाणी स्पर्द्धासमृद्धेव ।
कविवदननलिननिलया निर्माणं नूतनं तनुते ॥

अत्रोत्प्रेक्षया व्यतिरेकः । ब्रह्मसृष्ट्यपेक्षया कविसृष्टौ प्रकर्षप्रतीतेः । अत्र कविप्रौढोक्तिः । रसशङ्काया वाचि स्पर्द्धाया असम्भवात् ।

**मम—**

वक्षसि सखि ! ××× वल्लभपरिरम्भतः शान्ते ।
चन्दनरसो विनिहितः शीतोऽभूत्पूर्वमुष्णोऽपि ॥

अत्र प्रियाङ्गाहितशैत्यवद्वक्षःसंसर्गेण चन्दनस्य शैत्यं जातमिति वस्तु कविनिबद्धप्रौढोक्तिनिष्पन्नम् । वस्तुतस्तादृशत्वाभावात् । तेन च मम तद्विरहे चन्दनादयोऽनुकूला इति वस्तु व्यङ्ग्यम् । एवमन्यदुदाहार्यम् ।

एवं द्वौ लक्षणमूलौ शक्तिमूलेषु द्वौ शब्दशक्तिजौ द्वादशार्थशक्तिजाः । एक उभयशक्तिज इत्याह—**शब्देति** ॥ ९ ॥ अयं वाक्यएवेत्यर्थः ।

अस्फुटक्रमो रसाद्यात्मा पदैकदेशादिरूपाश्रयभेदेन षोढेत्याह—**पदेति** । 'लिखन्नास्ते भूमि'मित्यत्राऽबुद्धिपूर्वकं लिखनं पदैकदेशेन द्वितीयारूपेण प्राप्यते । रचना यथा—पुरुषव्यत्ययेन । वर्णः शृङ्गारादौ मधुरादिः । वाक्यादयः प्रसिद्धाः । एतेषां षोडशद्वैगुण्ये द्वात्रिंशत् । यत्र नानापदव्यञ्जकता तत्र वाक्याश्रयः । यत्रैकपदव्यञ्जकता तत्र पदाश्रयः । प्रबन्धगता द्वादशभेदा नाटकादौ प्रसिद्धाः । उभयशक्त्युत्थस्तु वाक्य एव । कस्याचित्पदस्य परिवृत्तेः कस्य चिद्वाऽपरिवृत्तेः, रेफपदे सम्भवात् । षड्भेदा रसादीनां सर्वसङ्कलने शुध्वनेरेकपञ्चाशद्भेदा

ये षोडशाद्या द्विगुणास्ते स्युर्वाक्यपदाश्रयात् ।
प्रबन्धेऽपि द्वादश स्युरर्थशक्तिभुवो भिदः ॥ ११ ॥
द्वात्रिंशद् द्वादशैकः षट् सर्वसङ्कलितध्वनेः ।
भेदाः स्युरेकपञ्चाशत् संभिन्नास्तु सहस्रशः ॥ १२ ॥
वक्तृस्यूतं बोधयितुं व्यङ्ग्यं वक्तुरभीप्सितम् ॥
स्वाङ्कुरितमतद्रूपं स्वयमुल्लासितं गिरः ॥ १३ ॥
कश्चित् साधारणः कश्चिदामन्त्र्य प्रतिबोधितः ।

---

इत्याह—**एको ऽस्फुटक्रमः** । एवं सप्तदश भेदाः तेष्वस्फुटक्रमं मुक्त्वा षोडशद्विगुणाः आश्रययोर्भेदादित्याह—**एष्वेवेति** ॥१०॥ अर्थशक्तिजस्य अन्येऽपि द्वादश भेदा इत्याह-**प्रबन्धेपीति** ॥११॥ सङ्करसंसृष्टिभ्यां पुनः सम्भेदे वा बाहुल्यमित्याह-**सम्भिन्ना इति** ॥१२॥ पुनर्व्यङ्ग्यस्य विभागान्तरमाह-**वक्तृस्यूतमिति** ॥१३॥ पूर्वप्रपञ्चितं व्यङ्ग्यं द्विविधम् । वक्तृस्यूतं स्वाङ्कुरितं च । तत्र वक्तुर्बोधयितुमभीप्सितं व्यङ्ग्यं वक्तृस्यूतं अतद्रूपं वक्तुरभिप्रायाविषयः सहृदयैः प्रतीयमानं स्वाङ्कुरितं गिरो व्यङ्ग्यं यतस्तद्गिरस्स्वयं वक्तृतात्पर्यं विनोच्छ्वासितमित्यर्थः । एवं च वक्तृतात्पर्यविषयि वक्तृस्यूताद्भिन्नं स्वाङ्कुरितमिति सिद्धम् । तत्र वक्तृस्यूतं चतुर्विधं यत्सहृदयमात्रे प्रतिपादयितुमभिमतं तत्साधारणं यथा—

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः ॥
उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥

अत्र गर्वाविष्कारः सर्वसाधारणो व्यङ्ग्यः बोद्धुः साधारणत्वात् । यत्र सम्बोध्याभिप्रायेण प्रयोगस्तत्रामन्त्र्य प्रतिबोधितः । बौद्धो यथा—

पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।

काश्चित्तटस्थः कश्चिच्च बोधितप्रतिबोधितः ॥ १४ ॥
इत्येवं बोद्धृवैचित्र्याद्वक्तृस्यूतं चतुर्विधम् ।
उपेक्षानिह्नवाभ्यां च द्विधा स्वाङ्कुरितं मतम् ॥ १५ ॥
भूतादिकालभेदेन निह्नवः स्यादनेकधा ।

---

उण्णअपयोहरं पेक्खिउण जइ वससि ता वससु ॥

अत्रामन्त्र्य पथिकस्यैव प्रतीतिः क्रियते ।

उअ णिच्चलणिप्फंदा भिसिणीपत्तम्मि रेअइ वलाआ ॥
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्तिव्व ॥

अत्र सखीमामन्त्र्य वदन्त्या सङ्केतस्थानरूपोऽर्थः तटस्थे प्रतिबोधितुमिष्टः ।

'मथुरापथिक मुरारेरुपगेयं द्वारि बल्लवीवचनम् ।
पुनरपि यमुनाकूले कालियगरलाऽनलज्वाला ॥

अत्र गोपीबोधितेन पथिकेन प्रतिबोधितः कृष्णो बोधितुमिष्टः । एवं बोद्धुश्चातुर्विध्येन वक्तृस्यूतं चतुर्विधमित्याह—**कश्चिदिति** ॥१४॥ एकः साधारणो बोद्धा इत्येवं क्रमेण बोद्धुश्चातुर्विध्यमित्यर्थः । स्वाङ्कुरितमपि द्विविधम् । क्वचिदपेक्षया यथा—

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ देण ।
गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ॥

अत्र सिंहसद्भावं ज्ञात्वा देवपूजायै कुसुमावचायार्थमस्मत्सङ्केतस्थलं गोदावरीकच्छमेष मा यात्वित्याशयः । अत्रोपेक्षा निन्हवाभावात् । स्वाङ्कुरितत्वं चामुकस्याशयप्रतीतिर्भवत्वित्याशयेन प्रयोगाभावात सहृदयानां स्वयमेव तथाशयः प्रतीयते ।

अयि पिहुलं जलकुम्भं घेत्तूण समागदह्मि सहि तुरिअं ।
समसालिलसेअणीसहा वीसमामि खणं ॥

अत्र भूतं चौर्यरतं निन्हूयते । स्वाङ्कुरितत्वमस्य कस्य चित्प-

अनेनापि प्रभेदेन व्यक्तिवल्ली विजृम्भते ॥ १६ ॥
नानाप्रभेदा नियताः क्वचित् प्रकरणादिना ।
अर्थेऽर्थमन्यं यं वक्ति तद्वाच्यव्यङ्ग्यमिष्यते ॥ १७ ॥
महादेवः० ॥ महति मुनिसङ्घ्यः० ॥ १८ ॥

इति चन्द्रालोकालङ्कारे ध्वनिनिरूपणो नाम सप्तमो मयूखः ।

---

तीतिर्भवत्वित्याशयेन प्रयोगाभावात् । निन्हवः स्फुटमेव । कालऽश्चात्र भूतः । एवं कालान्तरेऽप्युदाहार्यम् । तस्माद्वक्तृस्थूलादिभेदेनाऽपि व्यङ्ग्यभेदः सम्भवतीत्युपसंहरति—**अनेनापीति** ॥ १५ ॥ १६ ॥ यथाऽर्थान्तरसंङ्क्रमितादिर्भेदस्तथा ऽयमपीत्यर्थः । वाच्यव्यङ्ग्यमाह—**नानेति** ॥ १७ ॥ नानाप्रभेदा नानार्था वाक् प्रकरणादिना क्वचिदर्थे नियता नियमिता यं द्वितीयमर्थं वक्ति स वाच्यव्यङ्ग्य इत्यर्थः । स चासौ वाच्यव्यङ्ग्यश्चेति विग्रहः ।

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य ।
यस्याऽनुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

अत्र प्रकरणवशादभिधाया पुरुषे नियमनात् सिन्धुररूपोऽर्थो न केवलं वाच्यः किन्तु वाच्यः सन् व्यङ्ग्यः । कदाचिद्वाच्यो नियमनदशायां तु व्यङ्ग्य इत्याशयः ।

श्री**वीरभद्र**भूपतिलब्धनिदेशेन यत्नेन ।
**चन्द्रालोकमयूखः** सप्तम इह साधु सार्थको रचितः ॥

इति **शारदागमे** सप्तमो मयूखः ॥ ७ ॥

## अष्टमो मयूखः ।

यद्व्यज्यमानं मनसः स्तैमित्याय स नो ध्वनिः ।
अन्यथा तु गुणीभूतव्यङ्ग्यमापतितं त्रिधा ॥ १ ॥
व्यक्तिरेव क्वचिद्व्यङ्ग्यः क्वचिदर्थस्वभावतः ।
क्वचिच्चारुतरस्याग्रे स विमुञ्चति चारुताम् ॥ २ ॥
अगूढं कलयेदर्थान्तरसंक्रमितादिकम् ।
विस्मृतः किमपांनाथ स त्वया कुम्भसंभवः ॥ ३ ॥
अपरस्य रसादेश्चेदङ्गमन्यद्रसादिकम् ।

---

हलकृष्टतपनतनयावेपथुजाताऽनुकम्पेन ।
तद्व्यावृत्तहृदा मम हृदये स्थैर्यं समास्थेयम् ॥

तत्र पूर्वं विभक्तस्य ध्वने र्लक्षणं प्रदर्शयन्नेव तद्व्यतिरेकं मध्यमकाव्यस्य लक्षणमाह—**यदिति** ॥ १ ॥ व्यङ्ग्यप्रतीत्या यत्र मनसोऽत्यन्तमाल्हादः स ध्वनिः । आल्हादापकर्षे तु गुणीभूतव्यङ्ग्यम् । तच्च त्रिविधमित्यर्थः । विधां दर्शयति—**व्यक्तिरेवेति** ॥ २ ॥ क्वचिद्व्यक्तिर्व्यञ्जनैव चारुतां मुञ्चतीत्येकः प्रकारः । क्वचिद्व्यङ्ग्योऽर्थः स्वभावत एव चारुतां मुञ्चतीत्यपरः । क्वचिच्चारुरप्यर्थः चारुतरसन्निधानादचारुरित्यपरः । एवं त्रयो भेदा इत्यर्थः ।

मतान्तरे गूढव्यङ्ग्यादयो ऽष्टौ मध्यमकाव्यभेदास्तत्र सोदाहरणमगूढमाह-**अगूढमिति** ॥ ३ ॥ यत्रार्थान्तरसङ्क्रमितादिकमगूढं कलयेत्तत्र गुणीभूतमित्यर्थः । **विस्मृतइति** । समुद्रं प्रति कस्यचिदुक्तिः । अत्र स पुनस्त्वां यास्यतीति व्यङ्ग्यं स्फुटम् । 'स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहा'मित्यत्र येन क्षीरोदजन्मा जित स्तस्य सरोजन्मजये कियान् श्रम इति क्षीरोदजत्वं व्यङ्ग्यं अस्फुटम् । एवं व्यङ्ग्यस्य मध्याऽवस्था । यत्र व्यङ्ग्यं रसादि रसादेरङ्गं तदपराङ्गमि-

हा हा ! मत्कुचकाश्मीरलिप्तं भिन्नमुरः शरैः ॥ ४ ॥
तथा वाच्यस्य सिद्ध्यङ्गं नौरर्थो वारिधेर्यथा ।
संश्रित्य तरणिं धीरास्तरन्ति व्याधिवारिधीन् ॥ ५ ॥
अस्फुटं स्तनयोरत्र कोकसादृश्यवन्मतम् ।
कुङ्कुमाक्तं स्तनद्वन्द्वं मानसं मम गाहते ॥ ६ ॥
संदिग्धं यदि संदेहो दैर्घ्यांशुत्पलयोरिव ।
संप्राप्ते नयने तस्याः श्रवणोत्तंसभूमिकाम् ॥ ७ ॥
तुल्यप्राधान्यमिन्दुत्वमिव वाच्येन साम्यभृत् ।
कान्ते त्वदाननरुचा म्लानिमेति सरोरुहम् ॥ ८ ॥

---

त्याह–**अपरस्येति** ॥ ४ ॥ उदाहरणम्–**हाहेति** । रणभुवि पतितं कान्तमवलोक्य कस्याश्चिदुक्तिः । अत्र शृङ्गारः करुणस्याऽङ्गम् । एवमन्यदुदाहार्यम् । वाच्यसिद्ध्यङ्गमाह–**तथेति** ॥ ५ ॥ यद्वाच्यस्य सिद्ध्यङ्गं तद्वाच्यसिद्ध्यङ्गमित्यर्थः । **नौरिति** । यथा व्यङ्ग्यो नौरूपोऽर्थः वाच्यस्य वारिधेरङ्गमित्यर्थः । कुत्र नौर्वारिधेरङ्गमत आह— **संश्रित्येति** ॥ ५ ॥ अत्र तरणिशब्दस्तरिसूर्ययोर्विद्यमानोऽपि प्रकरणवशात्सूर्यनियमितस्तरेर्व्यञ्जकः व्यङ्ग्या च तरिः वारिधित्वं व्याधेः साधयति । व्याधिवारिधिरूपकस्य तरित्वेनोपपत्तेरित्यर्थः । अस्फुटव्यङ्ग्यमाह–**अस्फुटमिति** ॥ ६ ॥ अत्र कुङ्कुमाक्रान्तत्वादिना चक्रसादृश्यं व्यङ्ग्यं तच्च स्फुटम् । सन्दिग्धप्राधान्यमाह–**सन्दिग्धमिति** ॥७॥ यदि सन्देहस्तदा सन्दिग्धम् । यथा वाच्यं दैर्घ्यं व्यङ्ग्यमुत्पलसाम्यं वा प्रधानमिति सन्देहः । कुत्रेत्थं सन्देह इत्यत आह— **सम्प्राप्त इति** । तस्या नयने श्रवणोत्तंसभूमिकां प्राप्ते श्रवणपर्यन्त गते इति वाच्यं कर्णावतंसीभूतनीलोत्पलसदृश इति व्यङ्ग्यं तयोः किं प्रधानमिति सन्देह इति भावः । **तुल्यप्राधान्यमिति** ॥ ८ ॥ तुल्येति यथेन्दुत्वं व्यङ्ग्यं वाच्येन समं तुल्यप्राधान्यं तथाऽन्यदपी-

अमुन्दरं यदि व्यङ्ग्यं स्याद्वाच्यादमनोहरम् ।
सरस्यामीलदम्भोजे चक्रः कान्तां विलोकते ॥ ९ ॥
काकुस्थं प्रणतोऽम्भोधिरद्य माद्यतु रावणः ।
इत्यष्टधा गुणीभूतव्यङ्ग्यमङ्गीकृतं बुधैः ॥ १० ॥
महादेवः० । महति वसुसङ्ख्यः ॥ ११ ॥

इति चन्द्रालोकालङ्कारे गुणीभूतव्यङ्ग्यनिरूपणो नामाष्टमो मयूखः ।

---

त्यर्थः । कुत्र तथेत्यत आह-**कान्त इति** ॥ ८ ॥ त्वद्वदनमम्भोजं पराभवतीति वाच्यं वदनस्येन्दुसाम्यं तु व्यङ्ग्यं चन्द्रमसाऽपि पङ्कज-पराभवदर्शनात्तयोश्च तुल्यं प्राधान्यमित्यर्थः । असुन्दरमाह-**असुन्दरमिति** ॥ ९ ॥ वाच्यापेक्षया व्यङ्ग्येऽचारुणि असुन्दरं व्यङ्ग्यमित्यर्थः । उदाहरति-**सरस्या इति** । सरस्या मीलदम्भोजे सति सरस्या अम्भोजे मीलति चक्रः कान्तां पश्यति । अत्र विरहो भावीति व्यङ्ग्याद्वाच्यं निरीक्षणमेव सचमत्कारमित्यर्थः । काक्वाक्षिप्तमाह-**काकुस्थमिति** ॥ १० ॥ अत्र काकुवशात् रामे समागते तस्य मदस्य नावसर इति व्यङ्ग्यं काकुस्थं काकुनिष्ठमिति भावः । यं परिखीकृत्य निःशङ्को लङ्कायां रावणस्तिष्ठति स प्रणतः, रावणोऽद्य माद्यतु इति कस्यचिदुक्तिः व्यङ्ग्यं तु तदेव । अथ माद्यतीति युक्तः पाठः । अम्भोधौ प्रणतेऽपि माद्यतीति काकुः । माद्यत्विति पाठे चार्थे काकुस्फुटप्रतीतेः । भेदानुपसंहरति-**इतीति** । एते च त्रिष्वेवान्तर्भूता इति भावः ।

श्री**वीरभद्र**भूपतिलब्धनिदेशप्रभावेण ।
**चन्द्रालोक**मयूखो रचितोऽष्टम एष विस्पष्टः ॥

इति **शारदागमे**ऽष्टमो मयूखः ॥ ८ ॥

## नवमो मयूखः ।

मुख्यार्थस्याविवक्षायां पूर्वार्वाची च रूढितः ।
प्रयोजनाच्च संबद्धं वदन्ती लक्षणा मता ॥ १ ॥
लक्षणीयस्य शब्दस्य मीलनामीलनाद्विधा ।
लक्षणा सा त्रिधा सिद्धसाध्यसाध्याङ्गभेदतः ॥ २ ॥
स्फुटास्फुटप्रभेदेन प्रयोजनमपि द्विधा ।

---

योगाध्वपथिकनेता जेता दोषप्रचारस्य ।
अस्माकमिष्टसिद्धौ बुद्धावतरः प्रबुद्धोऽस्तु ॥

व्यञ्जनामुक्त्वा लक्षणामाह—**मुख्येति** ॥ १ ॥ यत्र मुख्यस्याऽविवक्षा भवति तत्र मुख्यार्थसम्बद्धमर्थं वदन्ती प्रतिपादयन्ती लक्षणा । सा च द्विविधा । पूर्वार्वाची च । पूर्वा रूढितः अर्वाची प्रयोजनादित्यर्थः । मुख्यार्थबाधमुपेक्ष्याऽविवक्षाविवक्षायां बीजमर्थान्तरसङ्क्रमितसङ्ग्रहः । तत्र बाधाभावात् । अविवक्षा तु बाध इव तत्रापि सम्भवति । रूढिः प्रसिद्धिः, यथोद्योतकरं व्याचष्ट इत्यत्र तत्कृतो ग्रन्थो लक्ष्यते, नह्यत्र प्रयोजनं किमप्यस्तीति रूढिरियं वक्तुः प्रयोजनमनुद्दिश्याऽपि तथा प्रयोगसम्भवात् । रूढिस्तु तादृशो लाक्षणिकोऽनादिः प्रयोगः । अग्निर्माणवक इति प्रयोजनलक्षणा । अग्निसदृश इत्यतो ऽप्रतीयमानस्याऽग्निगततीक्ष्णत्वातिशयस्येतः प्रतीतेः । सेयं लक्षणा द्विविधा । यत्र लक्षणीयस्य स्वशब्दो वाचकः शब्दस्य मीलनमकीर्तनं तत्रैका यथा—मञ्चाः क्रोशन्तीत्यत्र पुरुषवाचकस्याऽप्रयोगात् । अग्निर्माणवक इत्यादौ लक्ष्यवाचकस्यामीलने कीर्तने द्वितीयेति दर्शयति—**लक्षणीयेति** ॥ २ ॥ यथा मीलनामीलनाभ्यामुपाधिभ्यां द्विधा तथोपाध्यन्तरेण त्रिधेत्याह—**लक्षणेति** । यत्र विधेयो ऽर्थो लक्ष्यते सा सिद्धलक्षणा । यथा—कञ्चिन्मूर्खमुद्दिश्य भोः

विदुः स्फुटं तटस्थत्वादर्थगत्वाद्द्विधा बुधाः ॥ ३ ॥
अस्फुटं चार्थनिष्ठत्वात्तटस्थत्वादपि द्विधा ।
लक्ष्यलक्षकनिष्ठत्वादर्थसंस्थमपि द्विधा ॥ ४ ॥
लक्षकस्थं स्फुटं यत्र सा विचक्षणलक्षणा ।

---

पाषाण उरूकं गृहाणेति प्रयोगे । अत्र पाषाणशब्दलक्ष्यो न विधेय इति सिद्धलक्षणा । यत्र विधेयोऽर्थो लक्ष्यते सा साध्यलक्षणा । यथा—कामिनीजनापाङ्गदृष्टिः पीयूषवृष्टिरिति । अत्र विधायकशब्दे लक्षणस्वीकारात् । यत्र वाक्यमर्यादया ऽनुपपन्नस्य विधेयस्य सिद्धये लक्षणा सा साध्याङ्गलक्षणा । यथा गङ्गायां घोष इत्यत्र प्रवाहे ऽनुपपन्नस्य घोषस्य सिद्धये तीरलक्षणात् । गङ्गापदेन तीरविधानात् । येन प्रयोजनेन लक्षणा प्रागुक्ता तत्प्रयोजनं द्विधेत्याह—**स्फुटेति** ॥ ३ ॥ अग्निर्माणवकस्तैक्ष्ण्यातिशयप्रतिपादनं स्फुटं प्रयोजनम् । पटो दग्ध इत्यत्रैकदेशलक्षणायां तु न स्फुटं पटाभाव इव चातत्परिधाने कर्मानर्हताप्रतिपादनं हीह प्रयोजनम् । तच्चास्फुटमित्यर्थः । स्फुटस्य प्रयोजनस्य द्वैविध्यमाह—**विदुरिति** । स्फुटं प्रयोजनमेकं तटस्थमेकमर्थगतम् । यत्र प्रदीपनिर्वाणे ऽभिलषिते ऽमङ्गलभिया दीपं वर्द्धयेत्युच्यते तत्र प्रयोजनममङ्गलपरिहारस्तटस्थः वक्तृश्रोत्रोस्तत्प्रतिपत्त्यभावात् । अप्रतिपाद्यतया तटस्थस्यौचित्यात् । लक्ष्यलक्षकयोरर्थयोरविद्यमानत्वाच्च तटस्थत्वं नह्यमङ्गलपरिहारो लक्ष्यलक्ष्यकान्यतरवृत्तिरिति भावः । एवमन्नसमाप्तावपि बहुलमन्नमिति स्त्रियो वदन्ति तत्रापि द्रष्टव्यम् । कीर्तिरस्य शरच्चन्द्रचन्द्रिकेत्यर्थगतं निर्मलत्वादेः प्रयोजनस्य प्रतिपाद्यत्वात् । अर्थद्वैविध्यमाह—**लक्ष्येति** ॥ ४ ॥ तद्वदनं चन्द्र इत्यत्र कान्तिमत्त्वप्रतीतिर्लक्ष्ये, अयं चन्द्र एव तद्वदनमित्यत्र लक्षके लक्षणा । चन्द्रे वदनपदं प्रयुज्यते । न चात्र कान्तिमत्त्वं चन्द्रम-

अस्फुटत्वं तटस्थत्वं लक्ष्यस्थत्वममुष्य च ॥ ५ ॥
अन्यास्तिस्र इति व्यक्ता शक्तितः सा चतुर्विधा ।
इन्दुरेवैष तद्वक्त्रमुत्कर्षो लभ्यते मुखे ॥ ६ ॥
प्रदीपं वर्धयेत्यत्र तटस्थं मङ्गलोदयः ।
पटोऽयं दग्ध इत्यादौ स्फुटं नास्ति प्रयोजनम् ॥ ७ ॥
अमृतं सूक्तमित्यादौ लक्ष्यस्थमतिहृद्यता ।
आभिमुख्यात् संनिधानात्तथाऽऽकारप्रतीतितः ॥ ८ ॥
कार्यकारणभावात् सा वाच्यवाचकभावतः ।

---

सि लक्ष्ये प्रतीयते, प्रागेव प्रतीतेः । किं तु लक्षके मुखएवेति । इदानीं लक्षणायाश्चातुर्विध्यमाह—**लक्षकस्थमिति** ॥ ५ ॥ यत्र स्फुटं प्रयोजनं लक्षके सैकोदाहरणम् । पूर्वोक्तमेव भेदत्रयं चान्यदाह—**अस्फुटत्वेति** । अमुष्य प्रयोजनस्य । अन्या लक्षणाः । ननु प्रयोजनप्रतीतिः शक्तित एवेत्यत आह—**व्यक्तेति** ॥ ६ ॥ शक्तितो व्यक्ता भिन्ना ऽशक्या प्रयोजनप्रतिपत्तिर्न सम्भवतीति लक्षणैव प्रयोजनप्रतिपत्तये चतुर्विधा ऽङ्गीकर्तव्येत्यर्थः । लक्षकस्थमुदाहरति—**इन्दुरिति** । अत्र लक्षके मुखएव कान्तेरुत्कर्षः प्रतीयते इत्यर्थः । तटस्थमुदाहरति—**प्रदीपमिति** ॥७॥ अस्फुटमाह—**पटइति** । लक्ष्यस्थमाह—**अमृतमिति** ॥ ८ ॥ अतिहृद्यता प्रयोजनं लक्ष्यस्थमित्यर्थः । लक्षणाबीजभूतान् सम्बन्धान् दर्शयति—**आभिमुख्यादिति** ॥ ८ ॥ सा लक्षणा । आभिमुख्ये यथा—अङ्गुल्यग्रे करिशतमिति । अत्राऽङ्गुल्यग्रसंमुखो देशविशेषो लक्ष्यते । सन्निधाने यथा—गङ्गायां घोष इत्यत्र गङ्गासन्निहितदेशलक्षणात् । यत्र वास्तवं सन्निधानं नास्ति तत्र तथाकारप्रतीतित एव लक्षणा । भवति हि विधानं कस्याज्ञातपर्वतचन्द्रमण्डलदेशव्यवधानस्यापि सान्निध्यप्रतीतिर्भ्रान्ता

इत्येवमादेः संबन्धात् किंचान्यस्माच्चतुष्टयात् ॥ ९ ॥
सादृश्यात् समवायात् सा वैपरीत्यात् क्रियान्वयात् ।
सारोपाध्यवसानाख्ये गौणशुद्धे पृथक् पृथक् ॥ १० ॥

---

दोषविशेषवशात् । एवं च पर्वताऽग्रे चन्द्र इत्यत्र तथाकाशपर्वतसन्निहितो ऽयं देश इत्याकाशप्रतीतिरेव पर्वताग्रदेशस्थलक्षणीयचन्द्राधारदेशविशेषेण लक्षणाबीजं सम्बन्ध इत्याह-**तथेति** । यत्र ज्ञाततत्त्वस्य दोषविशेषेण भ्रान्तिस्तत्र लक्षणा । यत्र त्वज्ञाततत्त्वस्य भ्रान्तिस्तत्र शक्त्यैव प्रयोगस्तेन पर्वताग्र एव चन्द्रस्य प्रत्ययेन तदभिप्रायेणैव प्रयोगादिति दिक् । आयुर्घृतमित्यत्र कार्यकारणभावः । क्लेशे शान्तं पदं प्रयुज्यते न ह्यर्थे शकारान्तत्वं, तथा च तत्प्रतिपाद्येन क्लेशशब्देन लक्ष्यस्यार्थस्य वाच्यवाचकभावसम्बन्ध इत्याह-**वाच्येति** ॥ ९ ॥ अयमाशयः । स्वोपस्थाप्यशब्देन वाच्यवाचकभावलक्षणः सम्बन्ध एव तत्र लक्षणाबीजं शान्तपदोपस्थाप्यक्लेशशब्दवाच्यत्वस्य क्लेशे ऽर्थे सत्त्वादिति । **इत्येवमादेरिति** । घोटकपदं लवणे प्रयुज्यते तत्रैकपदवाच्यत्वं सम्बन्धः । सैन्धवपदवाच्यत्वस्य घोटकलवणयोः सत्त्वादित्येवमादेरित्यर्थः । किञ्चेत्यनेनोक्तं विशदयति-**सादृश्यादिति** । मुखचन्द्र इत्यादौ, समवाये छत्रिणो यान्तीति । नन्वत्र सन्निधिरचिरमस्तीति चेन्न । व्यवधाने ऽपि समुदायस्य तद्घटितत्वमादाय तथा प्रयोगात् । **वैपरीत्यादिति** । इभमुख इति वक्तव्ये भद्रमुख इति प्रयोगे व्यत्ययः सम्बन्ध इति टीकायां मूलकारः, तद्विचार्यते, शक्यलक्ष्ययोः सम्बन्धो ऽपेक्षितो व्यत्ययस्त्वत्र शब्दयोस्तस्माद्व्यत्यये विरोधः सम्बन्धो यथोपकारिप्रभृतावपकारिपदप्रयोगे । **क्रियेति** । यथा तादृशयुद्धकारितया ऽर्जुनादिपदप्रयोगे ।

इत्थं लक्षणमूलसम्बन्धान् विचार्य मतान्तरसिद्धं लक्षणाभेदमाह-**सारोपेति** । यत्र लक्ष्यलक्षकत्वयोर्द्वयोः प्रयोगः सा सारोपा ।

गौणं सारोपमुद्दिष्टमिन्दुर्मुखमितीदृशम् ।
गौणं साध्यवसानं स्यादिन्दुरेवेदमीदृशम् ॥ ११ ॥
शुद्धं सारोपमुद्दिष्टमायुर्घृतमितीदृशम् ।
शुद्धं साध्यवसानं स्यादायुरेवेदमीदृशम् ॥ १२ ॥
उपादानार्पणद्वारे द्वे चान्ये इति षड्विधा ।
कुन्ता विशन्ति गङ्गायां घोषो निवसतीति च ॥ १३ ॥
लक्ष्यलक्षकवैशिष्ट्यवैशिष्ट्याद्द्विविधा पुनः ।
सरसं श्राव्यममृतं विद्या स्थिरतरं धनम् ॥ १४ ॥
तथा सहेतुरतथाभेदभिन्ना च कुत्रचित् ।

---

यत्र लक्षकस्यैव प्रयोगः सा साध्यवसाना । तयोः सौन्दर्यादिगुणसम्बन्धेन प्रयोगे गौणत्वमन्यत्र शुद्धत्वमित्यर्थः । **गौणमिति** ॥११॥ एषा सारोपा उभयोः प्रयोगात् । गौणीव सौन्दर्यादिगुणपुरस्कारादित्यर्थः । **गौणमिति** । अत्रोभयोरप्रयोगादित्यर्थः । **शुद्धमिति** १२॥ अत्र गुणपुरस्कारेण कार्यकारणभावसम्बन्धेन प्रवृत्तेरित्यर्थः । एवं लक्षणाचतुष्टयं सिद्धम् । उपादानलक्षणा ऽर्पणलक्षणा वेति भेदद्वयमन्यदिति षड्विधेत्याह—**उपादानेति** ॥ १३ ॥ यत्र स्वसिद्धये पराक्षेपः सोपादानलक्षणा । यथा कुन्तैरात्मप्रवेशसिद्धये स्वसम्बन्धिनः पुरुषा आक्षिप्यन्ते । परस्य घोषस्य गङ्गाश्रयत्वसिद्धये गङ्गाशब्देन तटस्याऽर्पणं स्वार्पणं लक्षणेति क्रमेणोदाहरति—**कुन्ता इति** । लक्ष्यवैशिष्ट्यं विशेषणवत्त्वलक्षकं वा, एतस्माद्वैशिष्ट्याद्विशेषात् लक्षणायाः प्रकारद्वयमन्यादित्याह —**लक्षणेति** ॥ १४ ॥ लक्ष्ये विशेषणवत्त्वमुदाहरति— **सरसमिति** । लक्षके—**विद्येति** । तत्र काव्यस्य लक्ष्यस्य सरसत्वविशेषणं परत्र लक्षकस्य धनस्य स्थिरत्वमित्यर्थः । वैशिष्ट्यावैशिष्ट्यादिति तु पाठः सम्यक् । क्वचिदन्यतरं न क्वचिदुभयत्र विशेषणमित्येकः पक्षः, उभयत्र निर्विशेषणत्वमिति द्वितीयः

सौन्दर्येणैष कन्दर्पः सा च मूर्तिमती रतिः ॥ १५ ॥
शब्दे पदार्थे वाक्यार्थे संख्यायां कारके तथा ।
लिङ्गे चेयमलङ्कारांकुरबीजतया स्थिता ॥ १६ ॥
महादेवः० । महति नवसंख्यः० ॥ १७ ॥

इति श्रीजयदेवकविविरचिते चन्द्रालोकालङ्कारे लक्षणानिरूपणो नाम नवमो मयूखः ।

---

तदर्थे अवैशिष्ट्ये विद्याधनमित्युदाहरणम् । क्वचित्सहेतुर्लक्षणा क्वचिदसहेतुरिति च भेदद्वयमित्याह–**तथेति** ॥ १५ ॥ अतथाहेतुरिति भेदादपरद्वैविध्यमित्यर्थः । **सौन्दर्येति** । अत्र लक्षणायाः सौन्दर्यं हेतुः । अहेतोरुदाहरणं तु गङ्गायामित्यादौ स्फुटम् । उपाध्यन्तरेण लक्षणाया भेदान्तरमाह–**शब्दे इति** । शब्दे यथा–न सखिष्वादावग्निः । अत्र सखिशब्दे ऽकारस्याग्नित्वं प्रतिषिध्यते इकारप्राप्तिश्च सखिशब्दे लक्षणयेति (?)मुखचन्द्र इति पदार्थे । यद्गुरुवचनमाकर्णयन्ति तदमृतं पिबन्तीति वाक्यार्थे । अमृतं पिबन्तीति वाक्येन गुरुवचनाकर्णनस्य लक्षणात् । तस्याऽवाक्यार्थत्वात् । 'यावन्तो वयमाहवप्रणयिनस्तावन्त एवाऽर्जुना' इति एकस्मिन्नर्जुनबहुत्वोपचारः । अग्निना पचतीत्यत्राऽग्निः पचतीति कर्तृत्वोपचारः । लिङ्गे (?)हस्तिनि हस्तिनीयमिति सादृश्यात् । कस्मिंश्चिदन्तर्हितत्वादिसारूप्येण करिणि हस्तिनीति प्रयोगसम्भवात् । न च लक्षणानिरूपणमफलमिति, रूपकाद्यलङ्काराऽन्तरं प्रति बीजत्वादित्याह–**अलङ्कारेति** ॥ १६ ॥

श्री**वीरभद्र**भूपतिलब्धनिदेशेन यत्नेन ।
**चन्द्रालोकमयूखो** नवमः स्पष्टार्थतां नीतः ॥

इति **शारदागमे** नवमो मयूखः ॥ ९ ॥

## दशमो मयूखः ।

धर्मं कंचित् पुरस्कृत्य प्रायः शब्दः प्रवर्तते ।
यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः ॥ १ ॥
जात्या गुणेन क्रियया वस्तुयोगेन संज्ञया ।
निर्देशेन तथा प्राहुः षड्विधामभिधां बुधाः ॥ २ ॥
गौर्नीलः पाचको दण्डी डित्थः कंस इति क्रमात् ।
कं संहिनस्ति कंसारिर्नरं च कं समाश्रितम् ॥ ३ ॥

---

पवनजवप्रतिरोद्धा बोद्धाऽखिलवेदसारस्य ।
स्मृत्या कीर्तनतो वा कल्की क्लेशक्षयं तनुताम् ॥

अभिधां निरूपयन्नाह–**धर्ममिति** ॥ १ ॥ न केवलव्यक्तौ सङ्केतग्रहः शक्यः व्यक्तिमात्रस्याऽतिप्रसक्तत्वात् । व्यक्तौ विशेषस्य च विशेषकं धर्मं विना ऽनुपपत्तेः । अपि चैकव्यक्तौ सङ्केते व्यक्त्यन्तरप्रतीतिर्न स्यात् । प्रकृतव्यक्तिमात्रे चानन्त्येन प्रत्येकं सङ्केतस्य ग्रहीतुमशक्यत्वादित्यननुगमकतया च धर्म आवश्यक इत्यर्थः ।

नन्वेवं धर्मस्य सर्वत्राऽऽवश्यकत्वे प्राय इत्यनुपपन्नं, धर्मस्य नानात्वेनैकधर्मस्याऽपरत्राऽभावेन प्राय इति प्रयोगात् । आकाशादौ न प्रवृत्तिनिमित्तमिति मताश्रयणाद्वा । **शब्देति** । वृत्तित्रयं शब्दस्य । तत्र यया वृत्त्या शब्दः स्पष्टं साक्षादाचष्टे सा ऽभिधा । लक्षणादौ कंचिदर्थं प्रतिपाद्याऽर्थान्तरप्रतिपादनेन साक्षात्त्वाऽभावादित्यर्थः । अभिधेयभेदानाह–**जात्येति** ॥ २ ॥ गौरित्यादौ गोत्वादिजातिविषयिण्यभिधा । नील इत्यादौ गुणविषयिणी । याचक इत्यादौ क्रियाविषयिणी । पाकादिक्रियाप्रतीतेः । दण्डीत्यादौ वस्तुयोगविषयिणी । दण्डादेर्वस्तुनो योगस्य प्रतीतेः । डित्थ इत्यादौ संज्ञा । वक्तृयदृच्छया प्रवृत्तेः । कंस इत्यत्र निर्देश इत्याह–**गौरिति** ॥ ३ ॥ यत्र जात्या

न योगादेरायतनं न सङ्केतनिकेतनम् ।
वृत्त्या निर्देशशब्दोऽयं मुख्यया स्वाभिधेयया ॥ ४ ॥

द्योऽव्यवहिताः सम्बन्धेन तत्र जात्यादयः प्रवृत्तिनिमित्तम् । यत्र तु व्यवहितास्तत्र दण्डीत्यत्रेव गोत्ववानित्यादावपि वस्तुयोग एव । अत एव द्रव्ययोग इत्युपेक्ष्य वस्तुयोग इत्युक्तम् । न च वस्त्विवत्थेवास्तु सम्बन्धव्यवहितस्य तस्य प्राधान्याभावात् । प्रधानस्य सम्बन्धस्यैव प्रवृत्तिनिमित्तत्वात् । जात्यादेरपि वस्तुत्वेनैकविध्यप्रसङ्गाच्च । यद्यपि डित्थादावप्यसाधारणो धर्म एव प्रवृत्तिनिमित्तं तथाऽपि यदृच्छापरिकल्पितत्वेन जात्यादिभ्यः पार्थक्यम् । नाममात्रस्य जात्यादिसाधारण्याद्द्रव्यादीनामपि न्याय्यत्वात् । ननु कंसशब्दे कथं निर्देशत्वम् । कंसत्वस्य देवदत्तादेरिव प्रवृत्तिनिमित्तत्वादत आह-**कंसामिति** । कंसारिः कं ककारं समाश्रितं नरं नरकमित्यर्थः । सं आश्रितं कं च कंसमित्यर्थः । नरककंसौ कथं विष्णुना हताविति कस्यचित्प्रश्नः अयमाशयः—यत्र शब्दः स्वपरस्तत्र निर्देशसमाश्रितं, कमित्यत्र ह्याहृत्य सकारककारशब्दौ प्रतीयेते । न च वृत्तिं विना प्रतीतिः सम्भवति । तस्मात्तत्र शक्तिरेव, वृत्त्यन्तरस्याऽभावात् । एवं च शब्दस्य स्वपरत्वे जात्यादिभिन्नविषया षष्ठ्यभिधेति । एवं चैवंविधैः प्रयोगैः प्रतीयमानः कंसादिः शब्दो यत्र तत्र निर्देशोऽर्थः निर्दिश्यत इति व्युत्पत्त्या शब्दस्य निर्देशपदेन ग्रहणात् । यत्र तु कंसो हत इत्यादावर्थपरता तत्र जात्यादिष्वन्यतमत्वम् । न हि प्रकृतप्रयोगेऽर्थपरत्वं सम्भवति समाश्रितं कमित्यत्र शब्दस्यैव प्रतीतेरिति दिक् ।

स्वपरत्वे शब्दस्य योगो व्युत्पत्तिर्नास्ति आदिपदाज्जात्यादिरपि नात्रार्थः । नाऽपि डित्थादिवत्सङ्केतो यदृच्छया कल्पितस्तस्माद्यथा स्वाभिधा स्वस्य स्वरूपस्याभिधानं शब्देन सा मुख्या वृत्तिरेका जात्यादिस्थले भिन्ना ऽङ्गीकर्त्तव्येति दर्शयति-**न योगादेरिति** ॥ ४ ॥

पीयूषवर्षप्रभवं चन्द्रालोकमनोहरम् ।
सुधानिधानमासाद्य श्रयध्वं विबुधा मुदम् ॥ ५ ॥
जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मनः ॥
सूक्तिपीयूषवर्षस्य जयदेवकवेर्गिरः ॥ ६ ॥
महादेवः० ॥ जयदेवेन दशभिः० ॥ ७ ॥

इति चन्द्रालोकालङ्कारेऽभिधानिरूपणो नाम दशमो मयूखः ॥ १० ॥

---

निर्देशे स्वस्वरूपे । शब्दनिर्देशशब्दोऽयं सङ्केतयोगादेर्नायतनमपि तु मुख्यया वृत्त्या प्रवर्तत इत्यर्थः । **पीयूषेति** ॥ ५ ॥ सुधाया निधानं तस्मायं चन्द्रलोकं ग्रन्थं मनोहरमित्यादिरर्थः ।

श्री**वीरभद्र**देवेन भूदेवाऽमरशालिना ।
यशोदागर्भरत्नेनेदं नव्यं विनिर्मितम् ॥
लक्ष्मीर्वक्षसि कौस्तुभप्रणयिनो यावत्तथार्द्धाङ्गता-
मङ्गीकृत्य पुरद्विषो गिरिसुता स्थेमानमालम्बते ॥
यावद्वेदगिरः पुराणविधयस्तावद् भुवो मण्डले
चन्द्रालोकविकासमेष कुरुतां ग्रन्थोऽलिरामोदयः(?) ॥
श्री**वीरभद्र**भूपातिलब्धनिदेशेन यत्नेन ।
**चन्द्रालोकमयूखो** दशमः स्पष्टार्थतां नीतः ॥

इतिश्रीमहाराजाधिराजश्री**रामचन्द्रदेवा**त्मजयुवराजश्री**वीरभद्र**
देवादिष्ट**मिश्रश्रीबलभद्रात्मज**सकलशास्त्रारविन्द**प्रद्योत-**
**नभट्टाचार्य**विरचिते **चन्द्रालोकप्रकाशे**
**शारदागमे** दशमो मयूखः समाप्तः ॥

शारदागमनामा ग्रन्थः सम्पूर्णः ॥

IMPERIAL LIBRARY